Pandit Shivlal
Grahasanti
ग्रहशांति
Sanskrit
Paper - Printed
1957 sambad (119 years old)
72 Folio
9.8" x 4.4"
Complete

॥ ❋ अथ ग्रहशांतिप्रारंभः ❋ ॥



श्रीगणेशाय नमः ॥ अथ ग्रहशांति पद्धतिःप्रारम्भः ॥ ओंनत्वाजीवनरामशर्म्म
पितरं वागीश्वरीं श्रीगुरुं हेरंबं गिरिजापतिं गणपतिं ध्यायन्परांदेवताम् ॥ मातृ-
स्थापनपूजनाभ्युदयिकः श्राद्धैर्युतांप्रस्फुटां संक्षिप्तां ग्रहशांतिपद्धतिमहं कुर्वेसतां
प्रीतये ॥ अथादावाचार्यः शुचिः सन् हस्तमात्रं चतुरंगुलोन्नतं होमानुसारावाधिकं
वामध्योन्नतं समेखलं स्थंडिलं कृत्वा ततः स्थंडिलादग्निदिग्भागे कुड्यसमीपे रक्त
वस्त्राच्छादितं मातृस्थापनार्थं सुपीठं निर्माय तदुपरि पंचोर्ध्वाःपंचतिर्यक् व्रीहिभिः
र्यवैर्वारेखाः कृत्वा ताभिः षोडशकोष्ठात्मकं मंडलं विधाय तेषु षोडशाक्षतपुंजान्
कृत्वा तत्संलग्नकुड्यादौ पूर्वभागे सप्तघृतधाराः नात्युच्छ्रितनीचाः कृत्वा तासामु-
परि कुंकुमबिंदुभिर्विभूषयेत् ततः स्थंडिलादीशानदिग्भागे सपादहस्तपरिमितां

भूमिंत्यक्त्वा शुक्लवस्त्राच्छादितं द्विहस्तपरिमितं ग्रहपीठं निर्माय तदुपरि तंडु-
लैर्नवकोष्ठात्मकं मंडलं विधाय तेषु वृत्तमंडलमादित्ये चतुरस्त्रंनिशाकरे ॥ म-
हीपुत्रेत्रिकोणंस्याद्बुधेवैबाणसन्निभम् ॥ गुरौ च पट्टिशाकारं पंचकोणं तु भार्ग
वे ॥ धनुषाकृति मन्देच शूर्प्पाकारं तु राहवे ॥ केतूनां तु ध्वजाकारं मंडला
नि क्रमेणतु ॥ इति कुंकुमेन मंडलानि सँल्लिख्य तेषु च मुंष्टिमात्राऽभग्नश्वेततंडु
लैर्नवपुंजान् कृत्वा तन्मध्येतद्बाह्यतश्च वक्ष्यमाणक्रमेण यथास्थानमधिदेवा
दिस्थापनार्थं पुंजान् कुर्यात् ॥ ततः स्नातः कृतान्हिकः क्रोधलोभादिवर्जितः
सुवासाः सपत्नीकोयजमानः प्राङ्मुख उदङ्मुखोवा उपविश्य कृताचमनः

१ अष्टमुष्टिभवेत्कँचित्कंचिदष्टौ च पुष्कलमिति । २ दिनेप्राङ्मुखः रात्रौउदङ्मुखः शिवकार्येसर्वदैवोदङ्मुखः ।

कृतांजलिश्च सन्स्वेष्टदेवगुरुगणपतिनमस्कारपूर्वकं संकल्पं कुर्यात् ॥ तद्यथा सुमुखश्चैकदंतश्च कपिलो गजकर्णकः ॥ लंबोदरश्च विकटो विघ्ननाशो विनायकः ॥ १ ॥ धूम्रकेतुर्गणाध्यक्ष्यो भालचंद्रो गजाननः ॥ द्वादशैतानिनामानि यः पठेच्छृणुयादपि ॥ २ ॥ विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ॥ संग्रामे संकटे चैव विघ्नतस्य नजायते ॥ ३ ॥ शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं ॥ प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशांतये ॥ ४ ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ॥ येषामिंदीवरश्यामोहृदयस्थो जनार्दनः ॥ ५ ॥ अभीप्सितार्थ सिद्ध्यर्थं पूजितोयःसुरासुरैः ॥ सर्वविघ्नहृतेतस्मै गणाधिपतये नमः ॥ ६ ॥ सर्व मंगलमांगल्ये शिवे सर्वार्थसाधिके॥शरण्ये त्र्यंबके गौरि नारायणिनमोस्तुते॥७॥स

वंदा सर्वकार्येषुनास्तितेषाममंगलं॥येषां हृदिस्थोभगवान् मंगलायतनो हरिः ॥८॥
तदेवलग्नं सुदिनंतदेव ताराबलं चंद्रबलंतदेव ॥ विद्याबलं दैवबलंतदेव लक्ष्मीप
तेतेंघ्रियुगंस्मरामि ॥ ९ ॥ यत्र योगीश्वरःकृष्णो यत्र पार्थोधनुर्द्धरः॥तत्रश्रीर्विजयो
भूतिर्ध्रुवानीतिर्मतिर्मम ॥१०॥ सर्वेष्वारंभकार्येषुत्रयस्त्रिभुवनेश्वराः॥ देवादिशंतुनः
सिद्धिं ब्रह्मेशानजनार्दनाः ॥११॥ वक्रतुंडमहाकायसूर्यकोटिसमप्रभ ॥ अविघ्नं कुरु
मेदेवसर्वकार्येषुसिद्धिदः॥ १२ ॥ श्रीमन्महागणाधिपतयेनमः श्रीलक्ष्मीनारायणा
भ्यांनमः उमामहेश्वराभ्यांनमःशचीपुरंदराभ्यांनमः मातापितृभ्यांनमःओंतत्स
दद्येत्यादि देशकालौ संकीर्त्यामुकमासेऽमुकपक्षेऽमुकतिथावमुकवासरेऽमुककर्मप्रा
रंभनिमित्तं सूर्यादिनवग्रहाणामीश्वराद्यधिदेवतानामगन्यादिप्रत्यधिदेवतानांगणे

शादिपंचलोकपालानामिन्द्रादिदशदिक्पालानां प्रीतये अभीप्सितकामनासिद्ध्य
र्थं सकलदुरितोपशांतये मातृस्थापनपूर्वकं नवग्रहमखकर्माहंकरिष्ये ततः आशुः
शिशानइत्यनुवाक्येन आनोभद्राइत्यनुवाक्येनवाशांतिपाठं कुर्यात्॥ ओंआशुःशि
शानोवृषभोनभीमोघनाघनःक्षोभणश्चर्षणीनाम्॥संक्रंदनोनिमिषऽएकवीरःशतꣳ
सेनाऽअजयत्साकमिन्द्रः ॥ १ ॥ इत्यादि आनोभद्राःक्रतवोयंतुविश्वतोदब्धासोऽ
अपरीतासऽउद्भिदः॥ देवानोयथासदमिद्वृधेऽअसन्नप्रायुवोरक्षितारोदिवेदिवे॥१॥
देवानाम्भद्रासुमतिर्ऋजूयतान्देवानाꣳरातिरभिनोनिवर्त्तताम् ॥ देवानाꣳसख्य
मुपसेदिमावयंदेवानऽआयुःप्रतिरन्तुजीवसे ॥ २ ॥ तान्पूर्व्वयानिविदाहूमहेवय
म्भगम्मित्रमदितिन्दक्षमस्रिधं ॥ अर्य्यमणंवरुणꣳसोममश्विनासरस्वतीनःसु

भगामयंस्करत्॥३॥तन्नः॥ तन्नोवातोमयोभुवातुभेषजन्तन्मातापृथिवीतत्पितायौः॥ तद्ग्रावाणःसोमसुतोमयोभुवस्तदश्विनाशृणुतंधिष्ण्यायुवम् ॥४॥ तमीशानम् ॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमहेवयम्॥पूषानोयथावेदसाम संवृधेरक्षितापायुरदब्धःस्वस्तये ॥ ५ ॥ स्वस्तिनइन्द्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥ ६ ॥ पृषदश्वामरुतःपृश्निमातरःशुभंयावानोविदथेषुजग्मयः ॥ अग्निर्जिह्वामनवःसूरचक्षसोविश्वेनोदेवाऽअवसागमन्निह॥ ७ ॥भद्रंकर्णेभिःशृणुयामदेवाभद्रम्पश्येमाक्षभिर्यजत्राः॥स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितंयदायुः॥८॥शतमिन्नुशरदोऽअन्तिदेवायत्रानश्चक्राजरसन्तनूनाम्॥पुत्रासोयत्रपितरोभवन्तिमा

नौमुद्धचारीरिषूतायुर्गन्तौः॥९॥ अथपूजनक्रमः॥ आचम्यप्राणानायम्यप्राङ्मु[1] खोपविश्य अक्षतकुशान्गृहीत्वा ओंतत्सदद्यमासपक्षाद्युल्लिख्य अमुकगोत्रो मुकशर्मावर्मागुप्तोवाहं अमुककर्मप्रारंभनिमित्तं गणपतिदुर्गाश्रीसहितगौर्यादि षोडशमातृःपूजयिष्ये इतिवाक्यंकृत्वादक्षिणकरानामिकयास्पृशेदक्षतपुंजान्॥ओं गणपतिरसि गौर्यसि पद्मासि शच्यसि मेधासि सावित्र्यसि विजयासि जयासि देवसेनासि स्वधासि स्वाहासि मातासि लोकमातासि धृतिरसि पुष्टिरसि तुष्टिरसि आत्मकुलदेवतासि श्रीरसि ॥ ततोक्षतमादाय

स्वधा ९	माता. ११	लो. मा. १२	स्वाहा १०
देव ८	कुल १६	पद्मा २	सावि ५
जया ७	धृति१३गणेश्च	गौरी १_	विजया ६
तुष्टि १५	मेघा ४	शची ३	पुष्टि १४

१ देवाभिमुखः।

मध्यवायौ गजवक्त्रगणाध्यक्ष सर्वविघ्नविनाशन ॥ लंबोदरत्रिनेत्राढ्यआगच्छ गण
नायक ॥ १ ॥ ओंगणानांत्वागणपतिꣳहवामहे प्रियाणांत्वाप्रियपतिꣳहवामहे ॥
निधीनांत्वानिधिपतिꣳहवामहे वसोमम आहमजानिगर्भधमात्वमजासिगर्भधम्
॥१॥ओंभूर्भुवःस्वः गणपतेइहागच्छेहतिष्ठ॥मध्येनैर्ऋत्ये हिमाद्रितनयांदेवीं वरदां
भैरवप्रियां॥लंबोदरस्यजननीं गौरीमावाहयाम्यहम्॥१ ॥आयंगौःपृश्निरक्रमीदसं
दन्मातरंपुरः॥पितरंचप्रयंत्स्वः॥१॥ओंभूर्भुवःस्वःगौरीहागच्छेहतिष्ठ मध्येआग्नेयां
सुवर्णाढ्यांपद्महस्तांविष्णोर्वक्षस्थलेस्थितां॥त्रैलोक्यपूजितांदेवींपद्मामावाहयाम्य
हम् २ओंहिरण्यरूपाऽउषसोविरोकऽउभाविंद्रउदिथःसूर्यश्च ॥ आरोहतंवरुणमित्र
गर्तंततश्चक्षाथमादितिंदितिंचमित्रोसिवरुणोसि।२।ओंभूर्भुवःस्वःपद्मेइहागच्छेह

तिष्ठ॥बाह्यपश्चिमप्रथमे उत्पलाक्षींसुवदनांशशिकुंडलधारिणीं ॥ देवराजप्रियांभद्रां
शचीमावाहयाम्यहं ॥ ३ ॥ ओंकदाचनस्तरिरसिनेन्द्रसश्चसिदासुखे ॥ उपोपे
न्नुमघवन्भूयऽइन्नुतेदानंदेवस्यपृच्यते ॥ ३ ॥ ओंभूर्भुवःस्वः शचीहागच्छेहतिष्ठ ॥
बाह्यपश्चिमद्वितीये वैवस्वतप्रफुल्लाभाममलेंदीवरस्थितां ॥ बुद्धिप्रसादिनींसौम्यां
मेधामावाहयाम्यहं ॥४॥मेधांमेवरुणोददातुमेधामग्निःप्रजापतिः॥ मेधामिन्द्रश्चवा
युश्चमेधांधाताददातुमेस्वाहा॥४॥ओंभूर्भुवःस्वःमेधेइहागच्छेहतिष्ठ ॥ दक्षिणबाह्य
प्रथमे जगत्सृष्टींजगद्धात्रींपत्नीरूपेणसंस्थितां ॥ओंकाराक्षींभगवतींसावित्रीमाऽऽह
याम्यहं॥५॥ओंतत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥५॥
ओंभूर्भुवःस्वःसावित्रि इहागच्छेहतिष्ठ॥दक्षिणबाह्यद्वितीयेदैत्यक्षयकरींदेवींदेवानां

चाभयप्रदां ॥ गीर्वाणवंदितांदेवीं विजयामाव्हयाम्यहं ॥६॥ ओंविज्यंधनुःकपर्दिनो
व्विशल्योबाणवाँउत॥अनेशन्नस्ययाऽइषवऽआभुरस्यनिषंगथिः॥६॥ओंभूर्भुवःस्वः
विजयेइहागच्छेहतिष्ठ॥बाह्योत्तरमूर्ध्नि विष्णुरुद्रार्कशक्रादिगीर्वाणेषुव्यवस्थितां ॥त्रै
लोक्यवंदितांदेवींजयामावाहयाम्यहं॥७॥ओंयातेरुद्रशिवातनुरघोरापापकाशिनी॥
तयानस्तन्वाशंतमयागिरिशंताभिचाकशीहि ॥७॥ ओंभूर्भुवःस्वः जयेइहागच्छेह
तिष्ठ॥उत्तरेऽधःकोष्ठेबाह्ये मयूरवाहनारूढांशक्तिखड्गधनुर्द्धरां ॥ आवाहयेद्देवसेनां
तारकासुरमर्दिनीं ॥८॥ ओंदेवानांभद्रासुमतिर्ऋजूयतांदेवानाᳯंरातिरभिनोनिवर्त
ताम् ॥देवानाᳯंसख्यमुपसेदिमाव्वयन्देवानआयुःप्रतिरंतुजीवसे॥८॥ओंभूर्भुवःस्वः
देवसेनेइहागच्छेहतिष्ठ॥ बाह्येईशानकोणे कव्यमादायसततंपितृभ्योयाप्रयच्छति॥

पितृलोकार्चितांदेवींस्वधामावाहयाम्यहं ॥ ९ ॥ ओंपितृभ्यः स्वधायिभ्यः स्वधा
नमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधान
मःअक्षन्नपितरोमीमदंतपितरोतीतृपंतपितरःपितरः शुन्धध्वम्॥९॥ओंभूर्भुवःस्वः
स्वधेइहागच्छेहतिष्ठ ॥ बाह्येग्निकोणे हविर्गृहीत्वासततंदेवेभ्योयाप्रयच्छति॥वह्निप्रि
यातुसास्वाहासमागच्छतुमेध्वरे ॥१०॥ ओंस्वाहायज्ञंमनसःस्वाहोरोरंतरिक्षात्स्वा
हा॥द्यावापृथिवीभ्याᳪंस्वाहाव्वातादारभेस्वाहा ॥१०॥ ओंभूर्भुवःस्वः स्वाहेइहाग
च्छेहतिष्ठ॥पूर्वस्यांप्रथमकोष्ठे भूतग्राममिमंकृत्स्नं मयाप्रोत्यादितंपुरा ॥ त्रैलोक्यपू
जितां देवीं मातरं चाव्हयाम्यहं।११।ओंआपोऽअस्मान्मातरः शुंधयंतु घृतेननोघृ
तप्वःपुनंतु ॥ विश्वᳪंहिरिप्रम्प्रवहंतिदेवीरुदिदाभ्यःशुचिरापूतऽएमिदीक्षातपसो

स्तनूरसितान्त्वाशिवा॑ऽसग्माम्परिदधे भद्रंवर्णंपुष्यन् ॥ ११ ॥ ओंभूर्भुवःस्वःमा
तरिहागच्छेहतिष्ठ ॥ पूर्वस्यांद्वितीयेआवाहयेल्लोकमातृजगत्पालनसंस्थिता ॥ शक्रा
द्यैर्वंदितादेवि स्तोत्रपाठाभिचारकैः ॥ १२ ॥ स्वाहायज्ञंवरुणःसुक्षत्रोभेषजंकरत् ॥
अतिछंदाऽइन्द्रियं बृहदृषभोगौर्नव्ययोदधुः ॥ १२ ॥ ओंभूर्भुवःस्वःलोकमातरिहाग
च्छेहत्तिष्ठ ॥ मध्येवायुकोणे मनस्तुष्टिकरींदेवीं लोकानुग्रहकारिणीं ॥ सर्वकामसमृ
द्ध्यर्थं धृतिमावाहयाम्यहं ॥१३॥ यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरंतरमृतं प्रजा
सु ॥ यस्मान्नऽऋतेकिंचनकर्मक्रियतेतन्मेमनःशिवसंकल्पमस्तु ॥ १३ ॥ ओंभूर्भु
वःस्वःधृते इहागच्छेहतिष्ठ ॥ बाह्येनैर्ऋत्यकोणे प्रणतानांहिलोकेस्मिन्पुत्रपुष्टिसुख
प्रदां॥भक्तेभ्यश्चापिवरदांपुष्टिमावाहयाम्यहं ॥१४॥ ओंरयिश्चमेरायश्चमेपुष्टंचमेपु

ष्टिश्चमे विभुचमे प्रभुचमे ॥ पूर्णंचमे पूर्णतरंचमे कुयवंचमेक्षितंचमेन्नंचमे क्षुच्चमे यज्ञेनकल्पन्ताम्॥ १४ ॥ ओंभूर्भुवःस्वः पुष्टेइहागच्छेहतिष्ठ ॥ बाह्येवायव्यकोणे आवाहयामितांतुष्टिं सर्वलोकसुखप्रदाम् ॥ संतोषभावनांदेवींरक्षणीयेध्वरेमम ॥ ॥१५॥ त्वष्टातुरीयोऽअद्भुतऽइन्द्राग्नीपुष्टिवर्द्धना॥द्विपदाच्छंदऽइन्द्रियमुक्षागौनवयो दधुः॥१५॥ ओंभूर्भुवःस्वःतुष्टेइहागच्छेहतिष्ठ ॥ मध्येईशानकोणे त्वमात्मादेहितांदे विसर्वकामफलप्रदां ॥ वंशरक्षणकर्त्रींचआगच्छागच्छमेध्वरे॥ १६ ॥प्राणायस्वाहापानायस्वाहा व्यानायस्वाहा चक्षुषेस्वाहा श्रोत्रायस्वाहा वाचेस्वाहा मनसे स्वाहा ॥ ओंभूर्भुवःस्वःआत्मकुलदेवते इहागच्छेहतिष्ठ ॥ १६ ॥ ओंअस्मेवोऽअस्त्विन्द्रियमस्मेनृम्णमुतक्रतुरस्मेवर्च्चांॅसिसंतुवः॥नमोमात्रे पृथिव्यै नमो मात्रे

पृथिव्या इयन्तेराड्यंतासि यमानोध्रुवोसिवरुणः कृष्यैत्वाक्षेमायत्वारय्यैत्वापोषाय त्वा ॥ १ ॥ इतिषोडशमातृप्रार्थना ॥ एवम्प्रत्येकमावाहनस्थापनेकुर्यात् ॥ ततः ऽसप्तघृतधारासु प्रथमतआरभ्य ॥ ओंशच्यैनमः शचीमावाहयामिस्थापयामि ॥ ॥ १ ॥ ओंलक्ष्म्यैनमः लक्ष्मीमावाहयामिस्थापयामि ॥ २ ॥ ओंधृत्यैनमः धृती मावाह० ॥ ३ ॥ ओंमेधायैनमः मेधामावाह० ॥ ४ ॥ ओंप्रज्ञायैनमः प्रज्ञामा वा०॥ ५ ॥ ओंपुष्ट्यैनमः पुष्टिमावाहयामि० ॥ ६ ॥ ओंसरस्वत्यैनमः सरस्वतीमा वा० ॥७॥ ततस्तासांप्रतिष्ठांकुर्यात् ॥ ओंतदस्तुमित्रावरुणातदग्ने शंयोरस्मभ्यमिद मस्तुशस्तम् ॥ अशीमहिगाधमुतप्रतिष्ठान्नमोदिवेबृहतेसादनाय ॥ १ ॥ मनोजू

---

१ श्रीयैनमः ।

तिर्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमंतनोत्वरिष्टंयज्ञꣳसमिमंदधातु॥ विश्वेदेवासऽ
इहमादयंतामोंꣳप्रतिष्ठ ॥ २ ॥ मनोजूतिर्जुषतामाज्यस्येतिमनसावाइदꣳसर्वमा
प्तन्तन्मनसैवैतत्सर्वमाप्नोतिबृहस्पतिर्यज्ञमिमंतनोत्वरिष्टंयज्ञꣳसमिमन्दधातिवि
तियद्विवृडन्तत्सन्दधातिविश्वेदेवासऽइहमादयन्तामितिसर्वेवैविश्वेदेवाः॥सर्वेणैवैत
त्संदधातिसयदिकामयेतद्ब्रूयात्प्रतिष्ठेति ॥ ३ ॥ एषवैप्रतिष्ठानामयज्ञोयत्रैतेनयज्ञे
नयजन्तेसर्वमेवप्रतिष्ठितंभवति ॥४॥ गौर्य्यादिषोडशमातरः गणेशाःवसोर्द्धारास
हिताः सुप्रतिष्ठिता वरदा भवंतु ॥ इत्यक्षतेनावकीर्य एकदैवप्रतिष्ठांकुर्यात् ॥ततःपा
द्यादि गृहीत्वा प्रथम आरभ्य॥ गणपतयेनमः एतानिपाद्यार्घाचमनीयस्नानीयपुन
राचमनीयानि ओंगणपतयेनमः इदमनुलेपनं ओंगणपतयेनमः इमानिपुष्पा

णि ओंगणपतयेनमः एतानिधूपदीपनैवेद्याचमनीयतांबूलपूगीफलदक्षिणा नम
स्काराणि ओंगणपतयेनमः॥ओंगौर्यैनमः॰ओंपद्मायैनमः॰ओंशच्यैनमः॰ओंमे
धायैनमः॥ ओंसावित्र्यैनमः॰॥ ओंविजयायैनमः॰॥ ओंजयायैनमः॰ओंदेवसेना
यैनमः॰ओंस्वधायैनमः॰ओंस्वाहायैनमः॰ ओंमातृभ्योनमः॰ ओंलोकमातृभ्यो
नमः॰ओंधृत्यैनमः॰ओंपुष्ट्यैनमः॰ओंतुष्ट्यैनमः॰ओंआत्मकुलदेवतायै॰ओंश्रि
यैनमः॰इतिपाद्यादिभिःप्रत्येकमर्चयेत् गुडपक्वान्नादिनैवेद्यं दद्यात्॥ फलमर्घ्यंदक्षि
णामुखवासं च स्थापितदेवताभ्यःपरिकल्पयामि ततःश्रीफलं देवताभिमुखं कृत्वा
रूपंदेहि जयंदेहि भाग्यंभवतिदेहिमे॥पुत्रान्देहिपशून्देहिसर्वान्कामांश्चदेहिमे ॥१॥
पत्रं पुष्पं फलंतोयंरत्नानि विविधानि च॥ गृह्णाणार्घ्यं मयादत्तंदेहिमे वांच्छितंफलं

॥ २ ॥ फलेनफलितंसर्वं त्रैलोक्यं सचराचरं ॥ फलस्यार्घप्रदानेन पूर्णाःसन्तुम
नोरथाः ॥ ३ ॥ गौर्य्यादिषोडशमातृणां वसोर्द्धारागणपतिकुलदेवीभिःसहिता
नां श्रीफलेनएषवोर्घः इतिसंप्रार्थ्य स्वाभिमुखंश्रीफलंकृत्वा समर्पयेत् ॥ ओंतत्पु
रुषाय विद्महे वक्रतुंडाय धीमहि ॥तन्नो दंतिप्रचोदयात्॥ ओंसुभगायै विद्महे का
ममाल्यायैधीमहि तन्नोगौरिप्रचोदयात् ॥ २ ॥ इति गणपतिगौरी गायत्र्यौ यथा
शक्त्या जपेत् ॥ ततोयजमानस्य तिलकंकृत्वा आशीर्वादान्पठेत् ॥ स्वस्तिनऽ
इन्द्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनो
बृहस्पतिर्दधातु ॥१॥ अनेन तिलकंकृत्वाअक्षतान्गृहीत्वापठेत् ॥ श्रीर्वर्चस्वमायु
ष्यमारोग्यमाविधात्पवमानंमहीयते॥धान्यंधन्यं पशुंपुत्रलाभंशतसंवत्सरं दीर्घमा

युः ॥ १ ॥ शतमानंभवतुशतायुर्वैपुरुषः ॥ शतेन्द्रियायुआयुरेवेंद्रियंवीर्यमात्मंध त्ते ॥२॥ शतंजीवशरदोवर्द्धमानःशतंहेमंताञ्छतमुवसंतान्॥शतमिन्द्राग्नीसविताबृ हस्पतिः शतायुषाहविषेमंपुनर्दुः ॥ ३ ॥ शतमिन्नुशरदोऽअंतिदेवायत्रानश्चक्राजर संतनूनाम्॥पुत्रासोयत्रपितरोभवंतिमानोमध्यारीरिषतायुर्गंतोः ॥ ४ ॥ मंत्रार्थाःस फलाःसन्तु पूर्णाःसन्तु मनोरथाः ॥ शत्रूणांबुद्धिनाशोस्तु मित्राणामुदयस्तव ॥ एभिर्मंत्रैर्मंत्राक्षतान् गृहीत्वा प्रार्थयेत् ॥ अद्यपूर्वोच्चरित एवं ग्रहगुणविशिष्टायां पुण्यतिथौ मातृकास्थापनपूजनकृतस्य विधेर्यन्न्यूनमतिरिक्तंतत्सर्वं भवतांब्रा ह्मणानां वचनात् श्रीगणेशांबिकयोः प्रसादाद्विधिवद्भवतु ॥ उत्तरेकर्मणिनिर्विघ्नम स्तु ॥ १ ॥ अथनांदीश्राद्धसौकर्य्यार्थ संकल्पविधिनोच्यते ॥ आचमनं प्राणाया

मंचकृत्वा दधिकुंकुमयवाक्षतदूर्वाजलान्येकीकृत्यसंकल्पंकुर्यात् ॥ सत्यवसुसंज्ञका
विश्वेदेवानांदीमुखाःओंभूर्भुवःस्वः इदंवः पाद्यंस्वाहानामयंचवृद्धिः ॥ सर्वंपि
तृकार्यमपिसव्येनैवस्वाहाकारसंयुक्तंयवैरेवदैववत्कुर्यात् ॥ अमुकगोत्रा मातृपिता
महीप्रपितामह्यः नांदीमुख्यः ओंभूर्भुवःस्वः इदंवःपाद्यंस्वाहानामयंचवृद्धिः ॥ अ
मुकगोत्राः पितृपितामहप्रपितामहाः नांदीमुखाः ओंभूर्भुवःस्वःइदंवः पाद्यंस्वा
हाऽनामयंचवृद्धिः ॥ अमुकगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः पत्नीस
हिताःनांदीमुखाःओंभूर्भुवःस्वःइदंवःपाद्यं स्वाहानामयंचवृद्धिः॥श्रीगणेशांबिकाः
इदंवःपाद्यंआचमनं ॥स्वस्तिनऽइंद्रेतिदिग्बंधनंकुर्यात् ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवा
स्वस्तिनःपूषा बिश्ववेदाः॥स्वस्तिनस्ताक्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधा

तु ॥ १ ॥ इत्यनेनाक्षतैर्दिग्बंधनंकुर्यात् ॥ आभ्युदयिकश्राद्धोपहाराणां पवित्रतास्तु देशकालपाकपात्रोपहारद्रव्यश्रद्धासंपदस्तु ॥ अद्येत्यादिप्रयोगः अमुकमासेऽमुकपक्षेऽमुकतिथावमुकवासरेऽमुककर्मप्रारंभनिमित्तं संकल्पविधिनाभ्युदयिकश्राद्धमहंकरिष्येसत्यवसुसंज्ञकानांविश्वेषांदेवानांनांदीमुखानांओंभूर्भुवःस्वःइदंवःआसनगंधाद्युपचारकल्पनंस्वाहानामयंचवृद्धिःअमुकगोत्राणांमातृपितामहीप्रपितामहीनांनादीमुखीनांओंभूर्भुवःस्वःइदंवः आसनगंधाद्युपचारकल्पनंस्वाहाऽनामयंचवृद्धिःअमुकगोत्राणांपितृपितामहप्रपितामहानांनांदीमुखानांओंभूर्भुवःस्वःइदंवःआसनगंधाद्युपचारकल्पनंस्वाहाऽनामयंचवृद्धिः अमुकगोत्राणांमातामहप्रमातामहवृद्धप्रमातामहानांपत्नीसहितानांनांदीमुखानांओंभूर्भुवःस्वःइदंवःआसनगंधाद्युप

चारकल्पनंस्वाहानामयंचवृद्धिः॥गणेशांबिकयोरासनंइदमर्चितंवोज्योतिःसूर्योज्यो
तिःपुष्पं अस्याभ्युदयिकश्राद्धस्यार्चनविधेः परिपूर्णतास्तु ॥ आचमनं सत्यवसुसं
ज्ञिकेभ्यो विश्वेभ्योदेवेभ्यःइदंवः यथायथाविभागं ब्राह्मणभोजनंवःस्वाहावृद्धिः ॥
अमुकगोत्राभ्यःमातृपितामहीप्रपितामहीभ्यः नांदीमुखीभ्यःओंभूर्भुवःस्वःइदंवः
यथायथाविभागं ब्राह्मणभोजनंस्वाहावृद्धिः॥अमुकगोत्रेभ्यःपितृपितामहप्रपिताम
हेभ्यः नांदीमुखेभ्यः ओंभूर्भुवःस्वः इदंवः यथायथाविभागंब्राह्मण भोजनंस्वाहावृ
द्धिः ॥ अमुकगोत्रेभ्यः मातामहप्रमातामहवृद्धप्रमातामहेभ्यः पत्निसहितेभ्योनां
दीमुखेभ्यः ओंभूर्भुवःस्वःइदंवः यथायथाविभागंब्राह्मणभोजनंस्वाहावृद्धिः ॥ ग
णेशांबिकाभ्यांब्राह्मणभोजनंस्वाहावृद्धिः।अस्याभ्युदयिकश्राद्धस्यसांगतासिद्ध्यर्थं

सत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्योनांदीमुखेभ्योओंभूर्भुवःस्वःइदंवः द्राक्षामलक
निष्क्रयणीदक्षिणामुखवासः प्रीयतांवःस्वाहावृद्धिः॥अमुकगोत्रेभ्योमातृपितामही
प्रपितामहीभ्योनांदीमुखीभ्यः ओंभूर्भुवः स्वः इदंवःद्राक्षामलकनिष्क्रयणीदक्षिणा
मुखवासः प्रीयतांवःस्वाहावृद्धिः ॥ अमुकगोत्रेभ्यःपितृपितामहप्रपितामहेभ्यः
नांदीमुखेभ्यःओंभूर्भुवःस्वः इदंवःद्राक्षामलकनिष्क्रयणीदक्षिणामुखवासःप्रीयतां
तस्वाहावृद्धिः ॥ अमुकगोत्रेभ्यः मातामहप्रमातामहवृद्धप्रमातामहेभ्यः पत्नीस
हितेभ्योनांदीमुखेभ्यः ओंभूर्भुवःस्वः इदंवःद्राक्षामलकनिष्क्रयणीदक्षिणामुखवा
सः प्रीयतांस्वाहावृद्धिः॥ विश्वेदेवाःप्रीयतामितिब्रूयात् ॥ तेदेवाःशांतिदास्तुष्टिदाः
पुष्टिदावरदाःभवंतु अद्यपूर्वोच्चरितएवंगुणविशिष्टायां पुण्यतिथौकृतैतदभ्युदयिक

श्राद्धविधेर्यन्न्यूनमतिरिक्तंतत्सर्वंभवतांब्राह्मणानांवचनात् श्रीगणेशांबिकयोःप्रसा दाद्विधिवद्भवतु ततःओंउपास्मैगायतानरः॥पवमानायेंदवे॥ अभिदेवांइयक्षते ॥१॥ मातापितामहीचैवतथैवप्रपितामही॥ पितापितामहश्चैवतथैवप्रपितामहःमाताम हस्तत्पिताचप्रमातामहकादयः एतेभवंतुसुप्रीताःप्रयच्छन्तुचमंगलं॥ १ ॥अनेन कर्मणानांदीमुखदेवताःप्रीयतांवृद्धिः॥ इतिसंकल्पविधिनानांदीश्राद्धंपरिपूर्णं ॥१॥ ततोबहिःशालामागत्यग्रहयज्ञप्रारंभनिमित्तं दधिदूर्वांकुशाग्रैश्चकुसुमाक्षतकुंकुमैः सिद्धार्थोदकपूगैश्चअष्टांगोअर्घ्यउच्यते इत्यष्टांगमर्घंसंपाद्यवरणंकुर्यात्॥ प्राङ्मुखः सपत्नीकोयजमानःस्थित्वाउदङ्मुखानांऋत्विजांवरणंकुर्यात्॥सुमुहूर्तेसुलग्नेक्षेमंक

१ देवाभिमुखः । २ यजमानदक्षिणांगस्थानां ।

ल्याणंआरोग्यंशुभंभवतु ॥ ततः शांतिसूक्तंपठेत् ॥ ओंआशुःशिशानोव्वृषभोन भीमोघनाघनःक्षोभणश्चर्षणीनाम् ॥ संक्रन्दनोनिमिषऽएकवीरःशतर्ठंसेनाऽअ जयत्साकमिन्द्रः ॥ १ ॥ संक्रन्दनेनानिमिषेणजिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णु ना ॥ तदिन्द्रेणजयततत्त्सहध्वंय्युधोनरऽइषुहस्तेनव्वृष्णा ॥ २ ॥ सऽइषु हस्तैः सनिषंगिभिर्व्वशीसर्ठंस्त्रष्टासयुधऽइन्द्रोगणेन ॥ सर्ठंसृष्टजित्त्सोमपाबाहुशर्द्ध्युंग्ग्र धन्वाप्प्रतिहिताभिरस्ता ॥ ३ ॥ बृहस्प्पतेपरिदीयारथनरक्षोहामित्राँ२ऽअपबाध मानः ॥ प्प्रभञ्जन्त्सेनाःप्प्रमृणोयुधाजयन्नस्म्माकमेद्ध्यविताारथानाम् ॥ ४ ॥ बल विज्ञायस्थविरःप्प्रवीरःसहस्वान्वाजीसहमानऽउग्ग्रः ॥ अभिवीरोऽअभिसत्त्वास होजाजैत्रमिन्द्ररथमातिष्ठगोवित् ॥ ५ ॥ गोत्रभिदंगोविदंव्वज्ज्रबाहुञ्जयन्तमज्ज्म

प्प्रमृणन्तमोजसा ॥ इमर्ठ॒सजाताअनुवीरयध्वमिन्द्रर्ठ॒सषायोऽअनुसर्ठ॒रभद्ध्वम् ६
अभिगोत्त्राणिसहसागाहमानोदयोव्वीरः शतमंन्युरिन्द्रः ॥ दुश्च्च्यवनः पृतनाषाड
युद्ध्योस्माकर्ठ॒सेनाऽअवतुप्प्रयुत्त्सु ॥७॥ इन्द्रऽआसान्नेताबृहस्प्पतिर्द्दक्षिणायज्ञःपु
रऽएतुसोमः॥देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्ग्रम् ॥ ८ ॥ इन्द्रस्य
व्वृष्ण्णोव्वरुणस्यराज्ञऽआदित्यानाम्मरुताᳬ॑शर्द्धऽउग्ग्रम् ॥ महामनसाम्भुवन
च्च्यवानाङ्घोषोदेवानाञ्जयतामुदस्थात् ॥९॥उद्धर्षयमघवन्नायुधान्युत्त्सत्त्वनाम्मा
मकानाम्मनाᳬ॑सि ॥ उद्वृत्त्रहंन्वाजिनांव्वाजिनांन्युद्रथानाञ्जयतांय्यन्तुघोषाः १०
अस्म्माकमिन्द्रःसमृतेषुध्वजेष्ष्वस्माकंजाऽइषवस्ताजयन्तु ॥ अस्म्माकंव्वीराऽ
उत्तरेभवन्त्वस्स्मा ँ॒ऽउदेवाऽअवताहवेषु ॥ ११ ॥ अमीषाञ्चित्तम्प्रतिलोभयन्तीगृ

हाणङ्गांन्यप्प्वेपरेहि ॥ अभिप्प्रेहिनिर्द्दहहृत्त्सुशोकैरन्धेनामित्रास्तमसासचन्ताम्
॥ १२ ॥ अवसृष्टापरापतशरव्व्येब्ब्रह्मसर्ठ॰शिते ॥ गच्छामित्रांन्प्रपद्यस्वमामीषा
ङ्कञ्चनोच्छिषः ॥ १३ ॥ प्रेताजयतानरऽइन्द्रोवःशर्म्मयच्छतु ॥ उग्ग्रावः सन्तुबाह
वो नाधृष्ष्यायथासथ ॥ १४ ॥ असौयासेनामरुतःपरेषामब्भ्यैतिनऽओजसास्प्प
र्द्धमाना ॥ तङ्गूहततमसापव्व्रतेनयथामीऽअन्योऽअंन्यन्नजानन् ॥ १५ ॥ यत्रबा
णाःसम्पतन्तिकुमाराव्विशिखाऽइव ॥ तन्नऽइन्द्रोबृहस्प्पतिरदितिः शर्म्मयच्छतुव्वि
श्वाहाशर्म्मयच्छतु ॥ १६ ॥ मर्म्माणितेव्वर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानु
वस्ताम् ॥ उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु ॥ १७ ॥ ओंगणाना
न्त्वागणपतिर्ठ॰हवामहे प्प्रियाणान्त्वाप्प्रियपतिर्ठ॰हवामहे निधीनान्त्वानिधिपति

ठं‍हवामहेव्वसोमम ॥ आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ॥ १ ॥ ततःआ
चम्यप्राणानायम्मदेशकालौसंकीर्त्यओंविष्णुः३श्रीमद्भगवतोमहापुरुषस्य विष्णो
राज्ञयाप्रवर्त्तमानस्यअद्यश्रीब्रह्मणोद्वितीयेपरार्द्धे श्रीश्वेतवाराहकल्पे जंबुद्वीपेभरत
खंडेआर्यावर्त्तांतर्गतब्रह्मावर्त्तैकदेशेअर्बुदारण्ये कुमारिकानाम्निक्षेत्रेश्रीमहानद्योःगं
गायमुनयोः पश्चिमेतटे श्रीसूर्यसंनिधौ अमुकवर्षे अमुकायने अमुकऋतौ अमु
कमासेऽमुकपक्षेऽमुकतिथावमुकवासरेऽमुककर्मप्रारंभनिमित्तंमनोभीष्टकामनासि
द्ध्यर्थंसर्वविघ्ननिवारणार्थं लाभक्षेमविजयारोग्यसंपत्प्राप्तिकामः ग्रहयज्ञकर्मग्रहय
ज्ञांगभूतंब्रह्माचार्यऋत्विजांवरणंचाहंकरिष्ये ॥ अर्घंगृहीत्वाप्रार्थयेत् स्वागतंभो
द्विजश्रेष्ठामदनुग्रहकारकाः ॥ इदमर्घ्यमिदंपाद्यंभवद्भिःप्रतिगृह्यतां ॥ १ ॥ अर्घोर्घो

र्घः प्रतिगृह्यतां प्रतिगृह्णामीतिप्रतिवचनं चरणप्रक्षालनंकृत्वा यत्फलंकपिलादाने
कार्त्तिक्यांज्येष्ठपुष्करे ॥ तत्फलंपांडवश्रेष्ठविप्राणांपादशौचने ॥ १ ॥ विप्रपादतल
घृष्टःक्षिप्यमाणस्तुयःकरः॥सकरःकरविज्ञेयःशेषाहिमकराकराः ॥ २ ॥ पृथिव्यांया
नितीर्थानितानितीर्थानिसागरे ॥ सागरःसर्वतिर्थानिविप्रस्यदक्षिणेपदे॥३॥तिलक
मंत्रः मनोस्त्वनंतायसहस्रमूर्त्तयेसहस्रपादाक्षिशिरोरुवाहवे ॥ सहस्रनाम्नेपुरुषाय
शाश्वतेसहस्रकोटियुगधारिणेनमः॥१॥अर्चनंब्रह्मणेप्रीयतां यदाबध्नमितिब्राह्मणह
स्तेकंकणंबध्नीयात् ॥ ओंयदाबध्नन्दाक्षायणाहिरण्यठंशतानीकायसुमनस्यमानाः॥
तन्मऽआबध्नामिशतशारदायायुष्माञ्जरदष्टिर्य्यथासम् ॥ १ ॥ अमुकगोत्रममुकप्र
वरममुकवेदस्यामुकशाखाध्यायिनममुकशर्म्माणंब्राह्मणंअस्मिन्नुग्रहयज्ञकर्माणिए

भिर्द्रव्यैः ब्रह्मत्वेनत्वामहंवृणे॥वृतोस्मि इतिप्रतिवचनं ततः ओंव्रतेनदीक्षामाप्नोति दीक्षयाप्नोतिदक्षिणाम्॥ दक्षिणाश्रद्धामाप्नोतिश्रद्धयासत्यमाप्यते॥१॥इतिपठेत् य थाचतुर्मुखोब्रह्मासर्वलोकपितामहः॥ तथात्वंममयज्ञेस्मिन् ब्रह्माभवद्विजोत्तम॥१॥ इतिसंप्रार्थ्य॥ ततःआचार्यंऋत्विजः पूर्वप्रकारेणवृणुयात् तत्रआचार्यप्रार्थना आ चार्योहियथास्वर्गेशक्रादीनांबृहस्पतिः॥ तथात्वंममयज्ञेस्मिन्आचार्योभवभोद्विज ॥१॥ इतिआचार्यप्रार्थना॥ ततोयथासंभवं मधुपर्काद्यैःकुंडलमुद्रिकावासोभिश्चाचा र्यादीन्पूजयेत्॥ स्वपादौप्रक्षाल्याचम्य वरणश्राद्धंकुर्यात्॥ आचार्यप्रमुखेभ्योब्रा ह्मणेभ्यः एतद्वःपाद्यं पादावनेजनं पादप्रक्षालनं एषवोर्घः इदमत्रचंदनंचपुष्पं स्व स्तिनइंद्रेतिदिग्बंधः ओंस्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनःपूषाविश्ववेदाः॥ स्व

स्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥ ६ ॥ वरणश्राद्धोपहारा
णांपवित्रतास्तु ॥ देशकालपाकपात्रद्रव्यश्रद्धासंपदस्तु ॥ ओंतत्सदद्येत्यादि मासे
पक्षे तिथौ वासरे वरणश्राद्धमहंकरिष्ये॥वृतेभ्योब्राह्मणेभ्यःइदमासनं वृतेभ्योब्राह्म
णेभ्यः इदमर्घ्यं वृतेभ्योब्राह्मणेभ्यः इदमर्चनं यथादत्तंगंधाद्यर्चनं कुंडलमुद्रिका
वासांसियज्ञोपवीतंतत्प्रत्याम्नायद्रव्यंवावृतेभ्योब्राह्मणेभ्यः अहंसंप्रददे ॥ इदमर्चि
तंवोज्योतिः सूर्योज्योतिदिपकंज्योतिः पुष्पं ॥ अस्यवरणश्राद्धविधेर्यन्न्यूनमतिरिक्तं
तत्सर्वंभवतांब्राह्मणानांवचनात् विधिवद्भवतु ॥ ततः सुजातेतियजमानहस्तेरक्षि
कांबध्नीयात् ओंसुजातोज्ज्योतिषासहशर्म्मवरूथमासदस्त्वः ॥ वासोऽअग्नेविश्व
रूपर्ठ॑सँव्ययस्वविभावसो ॥ १ ॥ दधिक्रावणेतिदधिवंदनं ओंदधिक्राव्णोअ

कारिषंजिष्णोरश्वस्यवाजिनः॥सुरभिनोमुखाकरत्प्रणआयुꣳखितारिषत् ॥ १ ॥ कां
डात्कांडादितिदूर्वामार्जनं ओंकाण्डात्कांडात्प्ररोहन्तीपरुषः परुषस्प्परि एवानोदू
र्वेप्रतनुसहस्रेणशतेनच ॥ १ ॥ याःफलिनीतिफलग्रहणं ओंयाःफलिनीर्य्याऽअफ
लाऽअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳहसः ॥१॥ हिरण्यग
र्भेतिमुद्रार्पणं॥ओंहिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातः पतिरेकआसीत्॥सदाधा
रपृथिवींद्यामुतेमाङ्कस्मैदेवायहविषाविधेम ॥ १ ॥ ततोभिषेकः ओंशांतिरस्तु पु
ष्टिरस्तु तुष्टिरस्तु वृद्धिरस्तु अविघ्नमस्तु आयुष्यमस्तु आरोग्यमस्तु बहुपुत्रंबहुध
नंचास्तु यत्पापंरोगमशुभमकल्याणंतद्दूरेप्रतिहतमस्तु द्विपदचतुष्पदेभ्यः सुशां
तिरस्तु ॥ अथपुण्याहवाचनं तत्रकर्ताचम्य सुमुखश्चैकदंतश्चेत्यादिपठित्वा श्रुत्वा

वा देशकालौसंकीर्त्यामुककर्मांगतयापुण्याहवाचनं करिष्ये ॥ तदंगतयागणपतिपूजनंचकरिष्ये ॥ इतिसंकल्प्यगणेशंपूजयेत् तद्यथा हेहेरंबत्वमेह्येहिअंबिकात्र्यंबकात्मज ॥ सिद्धिबुद्धिपतेत्र्यक्षसर्वलोकपितःपितः ॥ १ ॥ नागास्यनागहारत्वंगणनाथचतुर्भुजः ॥ भूषितःस्वायुधैर्दिव्यैःपाशांकुशपरश्वधैः ॥२॥ आवाहयामिपूजार्थंरक्षार्थंचममक्रतोः॥इहागत्यगृहाणत्वंपूजांरक्षचमेक्रतुं ॥३॥ इत्यावाह्यषोडशोपचारैः संपूज्य॥ पात्रेसफलमर्घ्यमादाय रक्षरक्षगणाध्यक्षत्र्यक्षत्रैलोक्यरक्षक॥भक्तानामभयंकर्त्तात्राताभवभवार्णवात्॥१॥द्वैमातुरकृपासिंधोदेवषाण्मातुरग्रज॥वरदस्त्वंवरंदेहिवांच्छितंवांच्छितार्थद ॥२॥ अनेनफलदानेनफलदोभवमेप्रभो॥इत्यर्घ्यंदत्वानत्वाप्रार्थयेत् वक्रतुंडमहाकायसूर्यकोटिसमप्रभ॥अविघ्नंकुरुमेदेव सर्वकार्येषुसर्वदा॥१॥

विघ्नेश्वरायवरदायसुरप्रियाय लंबोदरायसकलायजगद्धिताय॥नागाननायसितसर्प विभूषिताय गौरीसुतायगणनाथनमोनमस्ते॥२॥ भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वरायशुभदायसुरेश्वराय ॥ विद्याधरायविकटायचवामनायभक्तिप्रपन्नवरदाय नमोनमस्ते ॥ ३॥ नमस्तेब्रह्मरूपायविष्णुरूपायतेनमः ॥ नमस्तेरुद्ररूपायकरिरूपायतेनमः ॥ ४ ॥ इतिप्रार्थना ॥ अथकलशस्थापनं भूरसीतिभूमिप्रार्थना ॥ ओं भूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री ॥ पृथिवींय्यच्छपृथिवीन्दृꣳहपृथिवीम्माहिꣳसीः ॥ १ ॥ महीद्यौरितिधान्याधारंकृत्वा ॥ ओंमहीद्यौःपृथिवीचनऽइमंय्यज्ञंम्मिमिक्षताम् ॥ पिपृतान्नोभरीमभिः॥१॥आजिघ्रमितिकलशस्थापनं ओंआजिघ्रकलशंमह्यात्वाविशंत्विन्दवः॥ पुनरूर्जानिवर्त्तस्वसानःसहस्रंधुक्ष्वो

रुधारापयस्वतीपुनर्म्माविशताद्द्रयिः १ वरुणस्योत्तमित्यपः पूर्य्यं ओंव्वरुणस्योत्तंभन
मसिव्वरुणस्यस्कंभसर्जनीस्त्थोव्वरुणस्यऋतसदन्यसिव्वरुणस्यऋतसदनमासिव्वरु
णस्यऋतसदनमासीद ॥१॥याऽओषधिरितिसर्वौषधीप्रक्षेपः॥ओंयाऽओषधीः पूर्वा
जातादेवभ्यस्त्रियुगंपुरा॥मनैनुवम्भ्रूणामहर्ठंशतंधामानिसप्तच॥१॥ अश्वत्थेवेतिपं
चपल्लवं ॥ ओंअश्वत्थेवो निषदनम्पर्णेवोव्वसतिष्कृता ॥ गोभाजऽइत्किला
सथयत्सनवथपूरुषम् ॥१॥ याः फलिनीतिफलं ॥ ओंयाः फलिनीर्य्याऽअफलाऽअपु
ष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वर्ठंहसः ॥ १४ ॥ हिरण्यगर्भेति
मुद्रार्पणं ॥ ओंहिरण्यगर्ब्भः समवर्त्तताग्ग्रेभूतस्यजातः पतिरेकआसीत् ॥ सदाधार
पृथिवींद्यामुतेमाङ्कस्म्मैदेवायहविषाव्विधेम ॥ १५ ॥ पूर्णादर्वीत्युपरिष्ठात्पूर्णपा

त्रं ॥ ओंपूर्णादर्व्विपरापतसुपूर्णापुनरापत ॥ वस्नेवविक्रीणावहाऽइषमूर्ज्जर्ठंशत
क्रतो ॥ १८ ॥ याःफलिनीतिश्रीफलं ॥ ओंयाःफलिनीर्य्याऽअफलाऽअपुष्पा
याश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वर्ठंहसः ॥ १४ ॥ सुजातो
ज्योतिषेतिवस्त्रवेष्टनं ॥ओंसुजातोज्ज्योतिषासहशर्म्मवरुथमासदत्स्वः॥वासोऽअग्ने
विश्वरूपर्ठंसंव्व्ययस्वविभावसो॥ १७ ॥ ततः पाशहस्तंचवरुणमंभसांपतिमीश्वरं
आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां ॥ १ ॥ ओंभूर्भुवःस्वः वरुणइहागच्छेहतिति
ष्ठेतितत्रवरुणमावाह्य षोडशोपचारैः संपूज्यप्रार्थयेत् ॥ कलशस्यमुखेविष्णुर्ग्रीवा
यांचमहेश्वरः॥ मूलेचैवस्थितोब्रह्मामध्यमातृगणाःस्मृताः ॥ १ ॥ कुक्षौतुसागराः
सप्तसप्तद्वीपावसुंधरा॥ ऋग्वेदोथयजुर्वेदःसामवेदोप्यथर्वणः ॥ २ ॥ अंगैश्चसहिता

सर्वेकलशंतुसमाश्रिताः ॥ गायत्रीचैवसावित्रीशान्तिःपुष्टितथैवच ॥ ३ ॥ सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः॥आयांतुममशांत्यर्थंदुरितक्षयकारकाः ॥ ४ ॥ मातृदेवोभव पितृदेवोभव आचार्यदेवोभव अतिथिदेवोभव आशिषः प्रार्थयंते एतासत्याआशिषः संतु ततः ॥ अवनिकृतजानुमंडलःकमलमुकुलसदृशमंजलिंशिरस्याधायदक्षिणेनपाणिनासुवर्णपूर्णकलशं धारयित्वा दीर्घानागानद्योगिरयस्त्रीणि विष्णुपदानिचतेनायुःप्रमाणेनपुण्याहंदीर्घमायुरस्तु ॥ अपांमध्येस्थिता देवाःसर्वमप्सुप्रकीर्तितं ॥ ब्राह्मणानांकरेन्यस्ताःशिवाआपोभवंतुताः ॥ १ ॥ शिवा आपःसंतु ॥ लक्ष्मीर्वसतिपुष्पेषुलक्ष्मीर्वसतिपुष्करे॥सामेवसतुवैनित्यंसौमनस्यंतथास्तुनः ॥ १ ॥ सौमनस्यमस्तु ॥ अक्षतंचास्तुमेपुण्यंदीर्घमायुर्यशोबलं॥ यद्यच्छ्रे

यस्करंलोकेतत्तदस्तुसदामम ॥१॥ अक्षतंचारिष्टंचास्तु ॥ ब्राह्मणानांहस्तेअक्षतादि
दत्वा ॥ गंधाःपांतु मांगल्यंचास्तु ॥ पुष्पाणिपांतु सौश्रियमस्तु ॥ अक्षताःपांतु आयु
ष्यमस्तु॥तांबूलानिपांतु ऐश्वर्यमस्तु ॥ दक्षिणाःपांतु आरोग्यमस्तु॥दीर्घमायुःश्रेय
शांतिःपुष्टिस्तुष्टिश्चातु ॥ श्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंचारोग्यंचायुष्यंचास्तु
यत्कृत्वासर्ववेदयज्ञक्रियाकारणकर्म्मारंभाः शुभा शोभनाः प्रवर्तंते तमहमोंकार
मादिंकृत्त्वाऋग्यजुःसामाथर्वाशीर्वचनंबह्वर्षिमतंसमनुज्ञातंभवद्भिरनुज्ञातःपुण्यंपु
ण्याहंवाचयिष्ये॥वाच्यतांऋक् ॥ द्रविणोदाद्रविणसस्तुरस्यद्रविणोदाःसनरस्यप्रयं
सत् ॥ द्रविणोदावीरवतीमिषन्नोद्रविणोदारासतेदीर्घमायुः ॥१॥ यजुः ॥ द्रविणोदा
पिपीषतिजुहोतप्रचतिष्ठत ॥ नेष्ट्रादृतुभिरिष्यत॥२॥ऋक्॥सवितापश्चात्तात्सवितापू

रस्तात्सवितोत्तरात्तात्सविताधरात्तात् ॥ सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥१॥ यजुः॥ सविता त्वा सवाना ँ सुवतामग्निर्गृहपतीना ँ सोमो वनस्पतीनाम् ॥ बृहस्पतिर्वाचइंद्रो ज्येष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम् ॥ २॥ ऋक्॥ ॐ नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम् ॥ भागं देवेभ्यो विदधात्यायन्प्र चंद्रमास्तिरते दीर्घमायुः॥१॥ यजुः॥ ॐ न तद्रक्षा ँ सि न पिशाचास्तरंति देवानामोजः प्रथमज ँ ह्येतत् ॥ यो बिभर्ति दाक्षायण ँ हिरण्य ँ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥ २ ॥ ऋक् ॥ ॐ उच्चा दिवि दक्षिणावंतो अस्थुर्ये अश्वदाः सह ते सूर्येण ॥ हिरण्यदा अमृतत्वं भजंते वासोदाः सोम प्रतिरंत आयुः ॥१॥ यजुः ॥ उच्चा ते जातमंधसो दिवि सद्भूम्याददे ॥ उग्र ँ शर्म्म महि श्रवः ॥२ ॥ इत्येता ऋचः पुण्याहे

ब्रुयात्॥व्रतनियमतपःस्वाध्यायक्रतुदयादमदानविशिष्टानांसर्वेषांब्राह्मणानांमनः समाधीयतांसमाहितमनसःस्मःप्रसीदंतुभवंतःप्रसन्नाःस्मः॥अथपूर्वस्थापितकल शात्ताम्रपात्रेजलमादाययजमानमूर्धनिदुर्वयासेचनंकुर्यात्॥शांतिरस्तुपुष्टिरस्तुतु ष्टिरस्तु वृद्धिरस्तु ऋद्धिरस्तु अविघ्नमस्तु आयुष्यमस्तु आरोग्यमस्तुशिवमस्तुशि वंकर्म्मास्तु कर्मसमृद्धिरस्तु धर्मसमृद्धिरस्तु वेदसमृद्धिरस्तु शास्त्रसमृद्धिरस्तु पुत्र पौत्रसमृद्धिरस्तुधनधान्यसमृद्धिरस्तुइष्टसंपदस्तुअनिष्टानिरसनमस्तु भूमौ॥ यत्पा पंरोगमशुभमकल्याणंतद्दुरेप्रतिहतमस्तु॥ पात्रे॥ यद्यच्छ्रेयस्तत्तदस्तु उत्तरेकर्मणि निर्विघ्नमस्तु उत्तरोत्तरमहरहरभिवृद्धिरस्तु उत्तरोत्तराः क्रियाः शुभाःशोभनाःसंप द्यंतां तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंतां तिथिकरणेसमुहूर्ते सनक्षत्रे

सग्रहेसलग्नेसदैवतेप्रीयेतां दुर्गापांचाल्यौप्रीयेताम् अग्निपुरोगाविश्वेदेवाः प्रीयंताम् इन्द्रपुरोगामरुद्गणाःप्रीयंताम् वसिष्ठपुरोगाऋषिगणाः प्रीयंतां माहेश्वरीपुरोगाउमामातरःप्रीयंताम् अरुन्धतीपुरोगाएकपत्न्यःप्रीयंतां विष्णुपुरोगाःसर्वेदेवाःप्रीयंतां ब्रह्मपूरोगाःसर्वेवेदाःप्रीयंतांआदित्यपुरोगाःसर्वेग्रहाःप्रीयंतां ब्रह्मचब्राह्मणांश्चप्रीयंताम् अंबिकासरस्वतौप्रीयेताम् श्रद्धामेधेप्रीवताम् भगवतीकात्यायनीप्रीयताम् भगवतीमाहेश्वरीप्रीयताम् भगवतीऋद्धिकरीप्रीयताम् भगवतीवृद्धिकरीप्रीयताम् भगवतीसिद्धिकरीप्रीयताम् भगवतीपुष्टिकरीप्रीयताम् भगवतीतुष्टिकरीप्रीयताम् भगवंतौविघ्नविनायकौप्रीयेताम् सर्वाःकुलदेवताःप्रीयंताम् सर्वाः ग्रामदेवताःप्रीयंताम् सर्वाइष्टदेवताःप्रीयंताम्। भूमौ। हताश्चब्रह्मद्विषःहताश्चपरिपंथिनः

हताश्वविघ्नकर्तारः शत्रवः पराभवंयांतु शाम्यंतु घोराणि शाम्यंतु पापानि शाम्यंत्वीतय पात्रे शुभानिवर्द्धंतां शिवाआपःसंतु शिवाऋतवःसंतुशिवाअग्नयःसंतु शिवा आहु तयःसंतुशिवाओषधयःसंतु शिवावनस्पतयःसंतुशिवाअतिथयसंतु अहोरात्रेशि वेस्यातां ऋक । ॐ शंनःकनिक्रदद्देवःपर्जन्योअभिवर्षतु । शंनोद्यावापृथिवीशंत्र जाभ्यंःशंनएधिद्विपदेशंचतुष्पदे ॥ १ ॥ यजुः । ॐ निकामेनिकामेनःपर्जन्योवर्षतु फलवत्योनओषधयः पच्यंतां योगक्षेमोनःकल्पताम् ॥ २ ॥ पूर्णपात्रे जलंक्षिपे त्। शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिताआदित्यपुरोगाः सर्वेग्रहाः प्रीयंताम् ॥ भगवान्नारायणःप्रीयताम् भगवान्स्वामीमहासेनःप्रीयताम् पुरोनुवा क्यययायत्पुण्यंतदस्तु याज्यययायत्पुण्यंतदस्तु वषट्कारेणयत्पुण्यंतदस्तुप्रातः सूर्यो

दयेयत्पुण्यंतदस्तु एतत्कल्याणयुक्तंपुण्यमस्तु प्रण्याहंवाचयिष्ये वाच्यताम् ॥ब्राह्मं पुण्यमहर्यच्चसृष्ट्युत्पादकारकं ॥ वेदवृक्षोद्भवंनित्यंतएवाहंब्रुवंतुनः ॥ १ ॥ भो ब्राह्मणाःममसकुटुंबस्यसपरिवारस्यगृहेपुण्याहंभवंतोब्रुवंतु ३ ॐ पुण्याहं ३ ऋक् ॥ ॐउद्गातेवशकुनेसामगायसिब्रह्मपुत्रइवसवनेषुशंससि ॥ वृषेववाजीशिशुमती रपीत्यासर्वतोनःशकुनेभद्रमावदविश्वतोनःशकुनेपुण्यमावद ॥ यजुः ॥ ॐ पुनं तुमादेवजनाःपुनंतुमनसाधियः ॥ पुनंतुविश्वाभूतानिजातवेदःपुनीहिमा ॥ २॥ पृथि व्यन्मुद्धता यांतुयत्कल्याणंपुराकृतं ॥ ऋषिभिःसिद्धगंधर्वैस्तकल्याणंब्रुवंतुनः ॥ १॥ भोब्राह्मणाः ममसकुटुंबस्यसपरिवारस्यगृहे कल्याणंभवंतोब्रुवंतु ३ ॐ कल्या णं ३ ऋक् ॥ ॐ अपाः सोममस्त्वमिन्द्रप्रयाहिकल्याणीर्जायासुरणंगृहेते ॥ य

त्रारथस्यबृहतोनिधानंविमोचनंवाजिनोदक्षिणावत् ॥ १ ॥ यजुः ॥ ॐय्यथेमांवा
चंकल्याणीमावदानिजनेभ्यः ॥ ब्रह्मराजन्याभ्या ँ शूद्रायचार्य्यायचस्वायचारणा
यच ॥ प्रियोदेवानांदक्षिणायैदातुरिहभूयास मयंमेकामःसमृद्ध्यताम् ॥ २ ॥ साग
रस्यतुयाऋद्धिर्महालक्ष्म्यादिभिःकृता ॥ संपूर्णासुप्रभावाचतांतामृद्धिंब्रूवंतुनः ॥२॥
भोब्राह्मणाःममसकुटुंबस्यसपरिवारस्यगृहे ऋद्धिंभवंतोब्रुवंतु ३ ओंऋद्ध्यता
म् ३ ऋक् ॥ ॐ ऋद्ध्यामस्तोमंसनुयामवाजमानोमंत्रंसरथेहोपयातं ॥ यशो
नपक्कंमधुगोष्वंतराभूतांशोअश्विनोःकाममप्राः ॥ १ ॥ यजुः ॥ ॐ सत्रस्यऋद्धिर
स्यगन्मज्योतिरमृताअभूम ॥ दिवंपृथिव्याअध्यारुहामाविदामदेवाँस्वर्ज्योतिः ३
स्वस्तिस्तुयाऽविनाशाख्यापुण्यकल्याणवृद्धिदा ॥ विनायकप्रियानित्यंतांतांस्वस्ति

ब्रुवंतुनः ॥ १ ॥ भोब्राह्मणाःममसकुटुंबस्यसपरिवारस्यगृहे स्वस्तिंभवंतोब्रुवंतु ३ ॐ स्वस्ति ३ ऋक् ॥ ॐ स्वस्तिऋद्धिप्रपथेश्रेष्ठारेक्णस्यत्यभियावाममेति ॥ सानोअमासोअरणेनिपातस्वावेशाभवंतुदेवगोपा ॥ १ ॥ यजुः ॥ ॐ स्वस्तिऽनइंद्रोवृद्धश्रवाः स्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥ २ ॥ मृकंडसूनोरायुर्यद्ध्रुवलोमशयोस्तथा ॥ आयुषातेनसंयुक्ता जीवेमशरदःशतं॥१ ॥शतंजीवंतुभवंतः॥ऋक्॥ॐ शतंजीवशरदोवर्द्धमानःशतंहेमंताञ्च्छतयुवसतान् ॥ शतमिंद्राग्नीसवितावृहस्पतिःशतायुषाहविमेषंपुनर्दुः ॥ १ ॥ यजुः॥ॐ शतमिन्नुशरदोअंतिदेवायत्रानश्चक्राजरसंतनुनां॥पुत्रासोयत्रपितरो भवंतिमानोमध्यारीरिषतायुर्गंतोः ॥ २ ॥ शिवगौरीविवाहेयायाश्रीरामेनृपात्मजे॥ध

नदस्यगृहेयाश्रीरस्माकंसास्तुसद्मनि ॥१॥ ॐ अस्तुश्रीः ३ ऋक् ॐ श्रियेजातःश्रि
यश्र्आनिरियायश्रियंवयोजरितृभ्योदधाति ॥ श्रियावसानाअमृतत्वमायन्भवंतिस
त्यसमिथामितद्रौ ॥ १ ॥ यजुः ॥ ॐ मनसःकाममाकूतिंवाचःसत्यमशीय ॥ पशू
नाँ रूपमन्नस्यरसोय्यशः श्रीः श्रयतांमयिस्वाहा ॥ २ ॥ प्रजापतिर्लोकपालोधा
ताब्रह्मासदेवराट् ॥ भगवान्शाश्वतोनित्यंसनोरक्षतुसर्वतः ॥ १ ॥ भगवान्प्रजाप
तिःप्रीयताम् ॥ ऋक् ॥ ॐ प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरितावभूव ॥ यत्का
मास्तेजुहुमस्तन्नोऽअस्तुवयंस्यामपतयोरयीणाम् ॥ १ ॥ यजुः ॥ ॐ प्रजापतेनत्व
देतांन्यन्योविश्वारूपाणिपरितावभूव यत्कामास्तेजुहुमस्तन्नोअस्त्वयममुष्यपिता
सावस्यपितावयँ स्यामपतयोयोरयीणांस्वाहा ॥ २ ॥ आयुष्मतेस्वस्तिमते यज

मानायदाशुषे ॥ कृताःसर्वाशिषःसंतुऋत्विग्भिर्वेदपारगैः ॥ १ ॥ देवेन्द्रस्ययथास्व
स्तितथास्वस्तिगुरोर्गृहे ॥ एकलिंगेयथास्वस्तितथास्वस्तिसदामम ॥ २० ॥ ॐ आ
युष्मतेस्वस्ति ३ ऋक् ॥ ॐ स्वस्तयेवायुमुपब्रवामहैसोमंस्वस्तिभुवनस्ययस्प
तिः ॥ बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयआदित्यासोभवंतुनः ॥ १ ॥ यजुः ॥ ॐ प्र
तिपन्थामपद्महिस्वस्तिगामनेहसम् ॥ य्येनविश्वाःपरिद्विषोवृणक्तिविन्दतेवसु॥२॥
विश्वानिदेवसवितर्दुरीतानिपरासुव॥यद्भद्रंतन्नआसुव॥ऋक् ॥ ओंमहोअग्नेःसमिधा
नस्यशर्मण्यनागामित्रेवरुणेस्वस्तये ॥ श्रेष्टेस्यामसवितुःसविमनितद्देवानामवोअ
द्यावृणीमहे ॥ १ ॥ इमम्मेवरुणशुधी ॥ हवमद्याचमृडयत्वामवस्युराचके ॥ २ ॥
तत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहवोध्यु

रुशर्ठसमानआयुः प्रमोषीः ॥ ३ ॥ व्वरुणस्योत्तंभनमसिव्वरुणस्यस्कंभर्सज्जनी
स्थोव्वरुणस्यऽऋतसदन्यसिव्वरुणस्यऋतसदनमसिव्वरुणस्यऋतसदनमासीद ॥
॥ ४ ॥ इतिवरुणदैवत्यान् आशीर्मंत्रान्पठित्वा ॥ ओंमंत्रार्थाःसफलाःसंतुपूर्णाः
संतुमनोरथाः ॥ शत्रूणांबुद्धिनाशोस्तुमित्राणामुदयस्तव ॥ १ ॥ ऋग्वेदोथयजुर्वे
दः सामवेदोप्यथर्वणः ब्रह्मवक्रेस्थितानित्यंनिघ्नंतुतवशात्रवान् यंकामंकामयतेसो
स्मैकामः समृध्यते ॥इतिमंत्राक्षतान्यजमानहस्तेदद्यात्ततोयजमानः आचार्या
दीन्प्रार्थयेत् अस्ययागस्यनिष्पत्तौभवंतोभ्यर्थितामया सुप्रसादंप्रकर्त्तव्यंशांतिकं
विधिपूर्वकमिति ततः आचार्यः स्थंडिलेपंचभूसंस्कारान्त्रिस्त्रिःकुर्यात् तत्रप्रथमं
गौरसर्षपविकीर्णम् ततःकुशत्रयेणहस्तमितांपरितश्चतुरस्रांभूमिंपरिसमूह्य ३ ता

न्कुशानैशान्यांपरित्यजेत् ततोगोमयोदकेनोपलिप्प ३ श्रुवमूलेनकुशेनवाप्रागग्रं प्रादेशमात्रोत्तरोत्तरंत्रिरुल्लिख्योल्लेखनक्रमेणानामिकांगुष्टाभ्यांमृदमुधृत्यऐशान्या मुत्क्षिप्यवारिणातद्देशमभिषिंच्यशुद्धकांश्यपात्रेणाग्निमादाय तत्रप्रत्यङ्मुखंनिद ध्यात् स्वाभिमुखंनिदध्यादित्यर्थः तदनंतरंग्रहस्थापनंकुर्यात् तत्रसौकर्यायकुशकं डिकापूर्वंचरुश्रपणमादौ क्रियतेदोषाभावात् तद्यथा प्रथमंब्रह्मवरणंओंअद्यकर्तव्य ग्रहशांतिहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्त्तुंममुकगोत्रममुकशर्माणंब्राह्म णमेभिः पुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणे वृतोस्मीतिप्रतिबचनंओंय थाविहितंकर्मकुर्वितिहोत्राभिहिते ओंकरवाणीतिप्रतिवचनानंतरंअग्नेर्दक्षिणतःह स्तमितांभूमिंविहायतत्रशुद्धमासनंदत्त्वातदुपरिप्रागग्रान्कुशानास्तीर्यास्मिन्ग्रह

शांतिहोमकर्मणित्वंमेब्रह्माभवेत्यभिधायकल्पितासनेउपवेशयेत् ओंभवामीतिते
नोक्तेअग्निंप्रदक्षिणीकारयित्वातत्रोपवेश्य प्रणीतापात्रंमृन्मयंपुरतःकृत्वाजलेनापू
र्य्यकुशैराच्छाद्यब्रह्मणोमुखमवलोक्याग्नेरुत्तरतःआस्तरणभूमिमतिक्रम्यकुशोपरि
निदध्यात्ततःपरिस्तरणंतत्रपूर्वाग्राःपरिस्तरणकुशाःकार्याःबर्हिषश्चतुर्थभागमादा
याग्नेयादीशानांतंब्रह्मणोग्निपर्यंतंनैर्ऋत्याद्वायव्यांतंअग्नितःप्रणीतापर्यंतंततोग्नेरुत्त
रतःपश्चिमदिशिपवित्रछेदनार्थंकुशात्रयंपवित्रकरणार्थंसाग्रमनंतर्गर्भिकुशपत्रद्वयं
प्रोक्षणीपात्रं आज्यस्थाली चरुस्थाली संमार्ज्जनकुशात्रयं उपयमनार्थंवेणीरूपंकुश
त्रयंप्रादेशमितपालाशसामिधत्रयं स्रुवः स्रुक्आज्यं तंडुलाःषट्पंचाशदुत्तरयजमा

---

१ एकोनपंचाशद्बर्हिः । २ कुशाःपंचवाः । ३ कुशाःसप्तवा ।

नमुष्टिशतद्वयावच्छिन्नंतंडुलपूर्णपात्रं तिलयवग्रहसमिधः एतानिपवित्रच्छेदन
कुशानांपूर्वपूर्वदिशिक्रमेणासादनीयानितदुत्तरतअन्यदपियथाकार्यानुरूपमाचार
परिप्राप्तद्रव्यमासादनीयम् ततः पवित्रच्छेदनकुशैः प्रादेशमात्रंसंमाप्यपवित्रेच्छि
त्वा तानपास्य सपवित्रकरेणप्रणीतोदकंत्रिःप्रोक्षणीपात्रेकृत्वाऽनामिकांगुष्ठाभ्यां
उत्तराग्रेपवित्रेगृहीत्वात्रिरुत्पवनं ततः प्रोक्षणीपात्रस्यसव्यहस्तकरणं अनामि
कांगुष्ठाभ्यांपवित्रेगृहीत्वात्रिरुद्दिंगनं प्रणीतोदकेनप्रोक्षणीप्रोक्षणं ततः प्रोक्षणी
जलेनयथासादितद्रव्यसेचनं तद्यथा आज्यस्थलीप्रोक्षणं चरुस्थालीप्रोक्षणं संमा
र्ज्जनकुशप्रोक्षणं उपयमनकुशप्रोक्षणं समिधःप्रोक्षणं स्रुवप्रोक्षणं स्रुक्प्रोक्षणं आ
ज्यप्रोक्षणं तंडुलप्रोक्षणं पूर्णपात्रप्रोक्षणं तिलप्रोक्षणं यवप्रोक्षणं ग्रहसमिधःप्रोक्षणं

एवंअन्यदपियथासादितद्रव्यंप्रोक्ष्यअग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रनिधानंसपवि
त्रं ततः आज्यस्थाल्यामाज्यनिर्वापः चरुस्थाल्यांतंडुलनिर्वापः तंडुलांस्त्रिःप्रक्षाल्य
प्रणीतोदकमासिच्य तत्रकिंचिज्जलांतरंदत्वा ततः स्वयंचरुंगृहीत्वाब्रह्मणाचाज्यं
वह्नेरुत्तरतश्चरुंदक्षिणतःआज्यंनिदध्यात् अथग्रहस्थापनं तत्रग्रहपीठेगत्वा सुव
र्णपटकेलेख्यागंधैर्मंडलकेग्रहाः ॥ अथवाक्षतपुंजेषुशक्त्यावित्तानुसारतः ॥ १ ॥ इ
त्याद्युक्तप्रकारेणसपुंजंनवकोष्ठात्मकंमंडलंविधायसूर्यादीन्स्थापयेत् ॥ तत्रादौयज्ञर
क्षाविधानं तद्यथा गणाधिपंनमस्कृत्यनमस्कृत्यपितामहं॥विष्णुंरुद्रंश्रियंदेवींवंदेभ
क्त्यासरस्वतीं ॥ १ ॥ स्थानाधिपंनमस्कृत्यग्रहनाथंनिशाकरं ॥ धरणीगर्भसंभूतंश
शिपुत्रंबृहस्पतिं॥२॥दैत्याचार्यंनमस्कृत्यसूर्यपुत्रंमहाग्रहं॥राहुकेतुंनमस्कृत्ययज्ञारं

भेविशेषतः॥३॥शक्राद्यादेवताःसर्वान्मुनींश्चकथयाम्यहम्॥गर्गंमुनिंनमस्कृत्यना
रदंमुनिपुंगवं॥४॥वशिष्ठंमुनिशार्दूलंविश्वामित्रंतथैवच॥व्यासंमुनिंनमस्कृत्यसर्वं
शास्त्रविशारदं ॥ ५॥ विद्याधरान्मुनीन्योगान् आचार्यांश्चतपोधनान्॥ तान्सर्वान्
प्रणिपत्यादौयज्ञरक्षांकरोम्यहं ॥ ६ ॥ पूर्वेरक्षतुगोविंदआग्नेय्यांगरुडध्वजः ॥ या
म्यांरक्षतुवाराहोनारसिंहस्तुनैर्ऋते ॥ ७॥ वारुण्यांकेशवोरक्षेद्वायव्यांमधुसूदनः॥
उत्तरेश्रीधरोरक्षेदीशानेतुजनार्दनः ॥ ८ ॥ शंखोरक्षेच्चयज्ञाग्रेपृष्ठेखड्गस्तथैवच ॥
वामपार्श्वेगदारक्षेद्दक्षिणेतुसुदर्शनः ॥ ९ ॥ ब्रह्माणंमघवारक्षेदाचार्यंपातुवामनः॥
रक्षाहीनंतुयत्स्थानंतत्सर्वंपातुवामनः॥१०॥इतिरक्षाविधानं॥ अथसूर्यादीनांनवग्र
हाणामावाहनंपूजनंच॥ रक्तपुष्पाक्षतैर्मध्यकोष्ठे दिवाकरंसहस्रांशुंसुरासुरनमस्कृत

म् ॥ लोकनाथंविश्वनेत्रंसूर्यमावाहयाम्यहं ॥ १ ॥ उद्यंतंचमहातेजस्विनंचैवाभयप्र
दं ॥ दुर्निरीक्ष्यंखगमनंसूर्यमावाहयाम्यहं ॥ २ ॥ भानोसूर्यग्रहाध्यक्षकलिंगविष
योद्भव ॥ रक्तःकाश्यपगोत्रेयद्विभुजःपद्मलांछनः ॥ ३ ॥ सप्ताश्ववाहनागच्छपद्मम
ध्येवरप्रदः ॥ अग्निंदूतेतिमंत्रेणरुद्ररूपीप्रतिष्ठितः ॥ ४ ॥ अग्निंदूतंपुरोदधेहव्यवाह
मुपब्रुवेदेवाँ २ आसादयादिह ॥ १ ॥ आकृष्णेनेतिचओंभूर्भुवःस्वः कलिंगदेशोद्भ
वंकाश्यपसगोत्रमश्वारूढंक्षत्रियवर्णं सूर्यमावाहयामिप्राङ्मुखंस्थापयामि ॥ १ ॥
श्वेतपुष्पाक्षतैःआग्नेय्यां हिमरश्मिंनिशानाथंतारकाभिःसमन्वितं ॥ औषधीनांतुरा
जानमिंदुमावाहयाम्यहं ॥ २ ॥ अहोचंद्रजगत्प्राणयमुनाविषयोद्भवः ॥ सुश्वेता
त्रेयगोत्रेयगदापाणेवरप्रदः ॥ ३ ॥ दशाश्ववाहनायाहिउमारूपीसमाविश ॥ हुता

शनदलेदेवोमंत्रेणाप्स्वग्निनार्चितः ॥ ४ ॥ अप्स्वग्नेसधिष्ठवसौखधीरनुरुध्यसेगर्भेसं
जायसेपुनः ॥१॥ इमंदेवेतिचओंभूर्भुवःस्वः यमुनातीरदेशोद्भवमात्रेयसगोत्रंवैश्यव
र्णंचंद्रमावाहयामिप्रत्यङ्मुखंस्थापयामि ॥२॥ रक्तपुष्पाक्षतैः याम्यां धरणीगर्भसं
भूतंलोहितांगंसुवर्चसं ॥ कुमारंक्रूरकर्माणंभौममावाहयाम्यहं ॥ १ ॥ निर्जितारिंच
शत्रुघ्नमग्निमाश्रित्यदेवतां ॥ ऋषिभिःस्तूयमानंचभौममावाहयाम्यहं ॥ २ ॥ उ
ज्जयिन्यांसमुत्पन्नोभोभोभौमश्चतुर्भुज ॥ भरद्वाजकुलेजातशूलशक्तिगदाधरः ॥
॥ ३ ॥ वरदोमेषमारूढःस्कंदप्रियतडित्प्रभः ॥ स्योनापृथिवीतिमंत्रेणदलेयाम्येप्र
तिष्ठितः ॥ ४ ॥ स्योनापृथिविनोभवानृक्षरानिवेशनीयच्छानःशर्मसप्रथाः ॥१॥ अ
ग्निर्मूर्द्धेतिचओंभूर्भुवःस्वः अवंतिदेशोद्भवंभारद्वाजसगोत्रंवरदंमेषारूढंक्षत्रियवर्णं

भौममावाहयामियाम्यमुखंस्थापयामि ॥ पीतपुष्पाक्षतैरीशान्यां बुधंबुद्धिप्रदातारं सोमवंशसमुद्भवं ॥ यजमानहितार्थायबुधमावाहयाम्यहं ॥ १ ॥ अहोचंद्रसुतश्रीमन्मागधायांसमुद्भवः ॥ अत्रिगोश्चतुर्बाहोखड्गखेटकधारकः ॥ २ ॥ गदीवरदसिंहस्थःसुवर्णाभःसमाविश ॥ कृष्णवदीशपत्रेचइदंविष्णुप्रपूजितः ॥ ३ ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपांसुरे ॥ १ ॥ उद्बुध्येतिचओंभूर्भुवःस्वःमगधदेशोद्भवमत्रिसगोत्रंगदिनंवरदंसिंहस्थंवैश्यवर्णंबुधमावाहयामिउत्तराभिमुखं स्थापयामि ॥४॥ पीतपुष्पाक्षतैःउत्तरस्यां॥ बृहस्पतेंगिरापुत्रोदेवानांचपुरोहितः॥ त्रातारंसर्वदेवानांगुरुमावाहयाम्यहं ॥ २ ॥ अहोवाचस्पतेपीतसंजातःसिंधुमंडले॥ एह्यांगिरसगोत्रेयहयारूढश्चतुर्भुजः ॥ ३ ॥ दंडाक्षसूत्रवरदकमंडलुधरप्रभो ॥ महा

निंद्रेतिसंपूज्योविधिवदुत्तरेदले॥४॥महा ँ इंद्रोवज्रहस्तःषोडशीशर्मयच्छतु॥ हंतुपाप्मानंयोस्मान्द्वेष्टि ॥ १ ॥ बृहस्पतेइतिच॰ओंभूर्भुवःस्वः सिंधुदेशोद्भवमांगिरसगोत्रंविप्रवर्णंबृहस्पतिमावाहयामिउत्तराभिमुखंस्थापयामि ॥ ५ ॥ श्वेतपुष्पाक्षतैः पूर्वस्यां प्रविश्यजठरेशंभोर्निसृतःपुनरेवयः॥तंसुरारिगुरुंभक्त्याशुक्रमावाहयाम्यहं ॥ २ ॥ भोभोभोजकटेजातःशुक्रश्वेताश्ववाहनः॥ समागच्छचतुर्बाहोभृगुगोत्रविभूषणः॥ ३ ॥ परिघाक्षावलीहस्तकमंडलुधरप्रभो॥ शक्रवत्पूर्वपत्रेचशुक्रज्योतिश्चपूजितः॥ ४ ॥ शुक्रज्योतिश्चचित्रज्योतिश्चसत्यज्योतिश्चज्योतिष्मांश्च ॥शुक्रश्चऋतपाश्चात्यर्ठंहाः ॥ १ ॥ अन्नात्परीतिच॰ओंभूर्भुवःस्वःभोजकटदेशोद्भवंभार्गवसगोत्रंविप्रवर्णं शुक्रमावाहयामिप्राङ्मुखंस्थापयामि ॥ ६ ॥ कृष्णपुष्पाक्षतैः पश्चिमे

धर्मराजानुजंचैवभिन्नांजनसमप्रभं ॥ छायामार्तंडसंभूतंशनिमावाहयाम्यहं ॥ १ ॥
कृष्णांगंकृष्णवर्णंचकृष्णाजिनधरंतथा ॥ शूरंमंदगतिंचैवशनिमावाहयाम्यहं ॥२॥
अहोसौराष्ट्रसंजातच्छायापुत्रचतुर्भुजकृष्णवर्णार्कगोत्रेयबाणहस्तधनुर्धरःत्रिशूली
चसमागच्छवरदोगृध्रवाहनः॥प्रजापतेनेतिपूज्योविधिवत्पश्चिमेदले॥४॥ओंप्रजाप
तेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव॥यत्कामास्तेजुहुमस्तन्नोअस्तुवयꣳस्या
मपतयोरयीणाम् ॥१॥ शन्नोदेवीतिच ओंभुर्भुवःस्वः सौराष्ट्रदेशोद्भवं काश्यपसगो
त्रंशूद्रवर्णं शनिमावाहयामिप्रत्यङ्मुखंस्थापयामि ॥ ७ ॥ धूम्रपुष्पाक्षतैः नैर्ऋ
त्यां चक्रेणच्छिन्नमूर्द्धानंविष्णुभावनिरीक्षितं॥यजमानहितार्थायराहुमावाहयाम्यहं
॥२॥ राहोबर्वरकेदेशेसंजातःकायवर्जितः गोत्रेपैठीनसेह्योहिसिंहारूढोवरप्रदः ॥३॥

करालवदनश्रेष्ठकालरूपांजनप्रभः॥आयंगौरितिमंत्रेणपूज्योनैर्ऋत्यपत्रके ॥४॥ ओं
आयंगौःपृश्नीरक्रमीदसदन्मातरंपुरः ॥ पितरंचप्रयंत्स्वः ॥१॥ कयानश्चित्रेतिच ओं
भुर्भूवःस्वः बर्बरदेशोद्भवंपैठीनसगोत्रंशूद्रवर्णंराहुमावाहयामियाम्यमुखंस्थापया
मि ॥८॥ धूम्रपुष्पाक्षतैर्वायव्यां आंजनेयंमहारौद्रंबहुरूपंमहाग्रहं ॥ महाकायंमहा
क्रूरंकेतुमावाहयाम्यहं ॥१॥ एह्येहिभगवन्केतोव्योमचारिन्महामते ॥ ग्रहैस्तुसहि
तःसर्वैःकेतुमावाहयाम्यहं ॥ २ ॥ केतवोविविधाकारामलयाद्रिसमुद्भवाः ॥ द्विभुजा
जैमिनेगौत्रेगदाहस्तावरप्रदाः ॥३॥ आगच्छंतुकपोतस्थाःशोभनेमारुतेदले ॥ ब्रह्म
जज्ञानमंत्रेणचित्रगुप्तमिवार्चयेत् ॥ ४ ॥ ओंब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरु
चोव्वेनआवः ॥ सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ १ ॥ केतुंक

ण्वन्नेतिच ओंभूर्भुवःस्वः अंतर्वेदिसमुद्भवंजैमिनिसगोत्रंशूद्रवर्णकेतुमावाहयामि याम्यमुखंस्थापयामि ॥९॥ अथाधिदेवानामावाहनंस्थापनंच एवंग्रहान्प्रतिष्ठाप्य स्थापनीयाश्चदेवताः ॥ तेषांस्थानानिनामानिमंत्रांश्चप्रवदाम्यहं ॥१॥ रुद्रंत्र्यंबकमंत्रेणरवेरुत्तरतोन्यसेत् ॥ यस्ययोवर्णस्तद्वर्णपुष्पाक्षतैः ओंत्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनं॥उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ ओंभूर्भुवःस्वः शंभोइहागच्छेहतिष्ठ सोमस्याग्नेयिदिग्भागेश्रीश्चतेमेनकात्मजां ओंश्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् इष्णन्निषाणामुम्मइषाणसर्वलोकम्मइषाण ॥ ओंभूर्भुवःस्वःउमेइहागच्छेहतिष्ठ यदक्रंदेतिभौमस्ययाम्येस्कंदंप्रपूजयेत् ॥ ओंयदक्रंदःप्रथमंजायमानउद्यंत्समुद्रादुतवापुरीषात् श्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यं

महिजातंतेअर्वन्॥१॥ओंभूर्भुवःस्वःस्कंदइहागच्छेहतिष्ठ विष्णुंविष्णोरराटेतियजे
त्पूर्वेबुधस्यच॥ ओंविष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसिवै
ष्णवमसिविष्णवेत्वा॥१॥ओंभूर्भुवःस्वःविष्णोइहागच्छेहतिष्ठगुरोरुत्तरतोभ्यर्च्योंब्र
ह्माब्रह्मेतिमंत्रतः॥ओंआब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यःशूरइषव्यो
तिव्याधीमहारथोजायतांदोग्ध्रीधेनुर्वोढानड्वानाशुःसप्तिः पुरंधिर्योषाजिष्णूरथेष्ठा
सभेयोयुवास्ययजमानस्यवीरोजायतान्निकामेनिकामेनः पर्जन्योवर्षतुफलवत्योनऽ
ओषधयःपच्यंतांयोगक्षेमोनःकल्पतां ॥१॥ ओंभूर्भुवःस्वः ब्रह्मन्इहागच्छेहति
ष्ठ सजोषेंद्रेतिशुक्रस्यशक्रंप्राच्यांनिधापयेत्॥सजोषाइंद्रसगणोमरुद्भिःसोमंपिबवृ
त्रहाशूरविद्वान्॥ जहिशत्रूँ२रपमृधोनुदस्वथाभयंकृणुहिविश्वतोनः ॥१॥ ओंभूर्भुवः

स्वः शक्रइहागच्छेहतिष्ठ॥शनेःपश्चिमतःस्थाप्योयमायत्वेतिवैयमः॥ओंयमायत्वा
मखायत्वासूर्य्यस्यत्वातपसेदेवस्त्वासवितामध्वानक्तुपृथिव्याः सꣳस्पृशस्पाहिअ
र्चिरसिशोचिरसितपोसि ॥ ७॥ ओंभूर्भुवःस्वः यमइहागच्छेहतिष्ठ॥कार्षिरसीतिमं
त्रेणराहोःकालंतथोत्तरेओंकार्षिरसिसमुद्रस्यत्वाक्षित्याउन्नयामिसमापोऽअद्भिरग्म
तसमोषधीभिरोषधीः ॥ ८ ॥ ओंभूर्भुवःस्वः कालइहागच्छेहतिष्ठ॥चित्रगुप्तंतुकेतू
नांचित्रावस्वितिनैर्ऋते ॥ ओंचित्रावसोस्वस्तितेपारमसीय ॥ ओंभूर्भुवःस्वः चि
त्रगुप्तइहागच्छेहतिष्ठ ॥९॥ अथप्रत्यधिदेवतानामावाहनंस्थापनंच॥शंभोरग्रेयजे
द्वह्निंसनःपितेतिमंत्रतः ॥ ओंसनःपितेवसूनवेअग्नेसूपायनोभव॥ सचस्वानःस्वस्तये
॥ १ ॥ ओंभूर्भुवःस्वः अग्नेइहागच्छेहतिष्ठ ॥ आपोअद्येतिमंत्रेणह्युमायानैर्ऋते

ह्यपः ॥ ओं आपोअद्यान्वचारिषर्ठ रसेनसमसृक्ष्महिपयस्वानग्नऽआगमंतम्मासर्ठ सृजवर्चसाप्रजयाचधनेनच ॥२॥ ओंभूर्भुवःस्वःआपइहागच्छध्वमत्रतिष्ठध्वं ॥ धरांस्कंदाद्वायुकोणे ओंचिदसितयादेवतयांगिरस्वध्रुवासीदपरिचिदसितयादेवतयांगिरस्वध्रुवासीद॥३॥ओंभूर्भुवःस्वःधरेइहागच्छेहतिष्ठ॥विष्णुंनारायणोत्तरे॥ओंइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्॥समूढमस्यपाᳪसुरे॥४॥ओंभूर्भुवःस्वर्विष्णोइहागच्छेहतिष्ठ॥प्रजापत्युत्तरेचेंद्रं ओंइंद्रआसान्नेताबृहस्पतिर्दक्षणायज्ञः पुरऽएतुसोमः देवसेनानामभिभंजतीनांजयंतीनाम्मरुतोयंत्वग्रम्॥५॥ओंभूर्भुवःस्वःइंद्रइहागच्छेहतिष्ठ ॥ इंद्रादैंद्रींचपश्चिमे ओंइंद्रंदैवीर्विशोमरुतोनुवर्त्मानोभवन्यथेंद्रंदैवीर्विशोमरुतोनुवर्त्मानोभवन् एवमिमँय्यजमानन्दैवींश्चविशोमानुषींश्चानुवर्त्मानोभवंतु ६

ओंभूर्भुवःस्वः इंद्राणिइहागच्छेहतिष्ठ ॥ प्रजापतिंयमात्पश्चात् ओंप्रजापतेनत्वदे
तान्यन्योव्विश्वारूपाणिपरिताबभूव ॥यत्कामास्तेजुहुमस्तन्नोअस्त्वयममुष्यपितासा
वस्यपिताव्वयꣳस्यामपतयोरयीणाꣳस्वाहा ॥ रुद्रयत्तेक्रिविपरन्नामतस्मिन्हुतमस्य
मेष्टमसिस्वाहा॥७ओंभूर्भुवःस्वःप्रजापतेइहागच्छेहतिष्ठ॥ पन्नगान्कालपश्चिमे ओं
नमोस्तुसर्पेभ्योयेकेचपृथिवीमनुयेऽअंतरिक्षेयेदिवितेभ्यःसर्प्पेभ्योनमः।८।ओंभूर्भु
वःस्वःपन्नगाइहागच्छध्वमिहतिष्ठध्वं॥ईशानेचित्रगुप्तस्यब्रह्माणंसंप्रपूजयेत् ओंब्र
ह्मयज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोव्वेनआवः सबुध्न्याउपमाऽअस्यविष्ठाःसत
श्चयोनिमसतश्चव्विवः॥१॥ओंभूर्भुवःस्वःब्रह्मन्निहागच्छेहतिष्ठ॥अथगणपंचकंस्था
पयेत्ईशानेःकेतोश्चपूर्वेणगुरोःसूर्यस्यपश्चिमेलंबोदरःप्रतिष्ठाप्योगणानांत्वेतिमंत्रतः

॥ १ ॥ ओंगणानान्त्वागणपतिर्ठ्ंहवामहेप्प्रियाणान्त्वाप्प्रियपतिर्ठ्ंहवामहेनिधीनान्त्वानिधिपतिर्ठ्ंहवामहेव्वसोमम ॥ आहमजानिगर्ब्भधमात्वमजासिगर्ब्भधम् ॥ १ ॥ ओंभूर्भुवःस्वःगणपतेइहागच्छेहतिष्ठ॥ उत्तरेचततोदुर्गांजातवेदेतिमंत्रतः॥ ओंजातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः ॥ सनःपरिषदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः ॥ २ ॥ ओंभूर्भुवःस्वःदुर्गेइहागच्छेहतिष्ठ ॥ व्वायोयेतेसहस्त्रिणोरथासस्तेभिरागहि ॥ नियुत्वान्त्सोमपीतये ॥ ३ ॥ ओंभूर्भुवःस्वःव्वायोइहागच्छेहतिष्ठ ॥ ३ ॥ घृतंघृतेतिमंत्रेणअंतरिक्षंतुपश्चिमे ॥ ओंघृतंघृतपावानः पिबतव्वसांवसापावानः पिबतांतरिक्षस्यहविरसिस्वाहा ॥ दिशःप्रदिशऽआदिशोविदिशऽउद्दिशोदिग्भ्यःस्वाहा ॥ ४ ॥ ओंभूर्भुवः स्वः अंतरिक्षइहागच्छेहतिष्ठ॥

यावांकशेतिमंत्रेणयजेत्पूर्वेंततोश्विनौ ॥ ओंयावांकशामधुमत्यश्विनासूनृतावती ॥ तयायज्ञंमिमिक्षताम् ॥ ५ ॥ ओंभूर्भुवःस्वः अश्विनौइहागच्छतामिहतिष्ठतां ॥ इतिपंचलोकपालानांस्थापनं ॥अथनक्षत्रस्थापनं॥सप्तसप्तयजेद्धानांप्रागाद्यश्विनि पूर्वकं॥अश्विनातेजसादस्रं ओंआश्विनातेजसाचक्षुःप्राणेनसरस्वतीवीर्य्यम्॥ वाचें द्रोबलेनेंद्रायदधुरिंद्रियम्॥ १ ॥ ओंभूर्भुवःस्वः दस्रइहागच्छेहतिष्ठ यमायत्वेति याम्यंओंयमायत्वामखायत्वासूर्यस्यत्वातपसेदेवस्त्वासवितामध्वानक्तुपृथिव्याःस ठंस्पृशस्पाहि अर्चिरसिशोचिरसितपोसि ॥ २ ॥ ओंभूर्भुवःस्वः याम्यभइहागच्छे हतिष्ठ कृत्तिकाचायमग्निश्च ओंअयमाग्निःसहस्रिणोवाजस्यशतिनस्पतिःमूर्द्धाकवी रयीणाम्॥३॥ओंभूर्भुवःस्वःकृत्तिकेइहागच्छेहतिष्ठ ब्रह्मजज्ञेतिरोहिणी ओंब्रह्मजज्ञा

ग्र०शां० पद्ध०

॥३३॥

नंप्रथमंपुरस्ताद्विसीमतःसुरुचोव्वेनआवः ॥ सबुध्न्याउपमाअस्यव्विष्ठाःसतश्चयोनि मसतश्चव्विवः ॥ ४ ॥ ओंभूर्भुवःस्वःरोहिणीइहागच्छेहतिष्ठ सोमोधेन्वेतिसौम्यंच ओंसोमोधेनुꣳसोमोअर्वंतमाशुꣳसोमोव्वीरंकर्मण्यंददातिसादन्यंव्विदथ्यꣳसभेयं पितृश्रवणंयोददाशदस्मै ॥५॥ ओंभूर्भुवःस्वःसौम्यइहागच्छेहतिष्ठ ॥ नमस्तेरुद्ररौ द्रभं ओंनमस्तेरुद्रमन्यवउतोतऽइषवेनमः॥बाहुभ्यामुततेनमः ६ ओंभूर्भुवःस्वःरौ द्रभइहागच्छेहतिष्ठ अदितिःद्यौरादितेयं ओंअदितिर्द्यौरदितिरंतरिक्षमदितिर्म्माता सपितासपुत्रः॥विश्वेदेवाअदितिःपंचजनाऽअदितिर्ज्जातमदितिर्जनित्वम् ॥ ७ ॥ ओंभूर्भुवःस्वःआदितेयइहागच्छेहतिष्ठ ॥ एतानिपूर्वस्यांस्थाप्यानि ॥ पुष्यंवाचस्प तेनतु ओंव्वाचस्पतयेपवस्ववृष्णोऽअꣳशुभ्यांगभस्तिपूतः देवोदेवेभ्यःपवस्वयेषां

॥३३॥

भागोसि ॥ ८ ॥ ओंभूर्भुवःस्वःपुष्यइहागच्छेहतिष्ठ सर्पेभ्यःसर्पदैवतं ओंनमोस्तुस
र्पेभ्योयेकेचपृथिवीमनुयेअंतरिक्षेयेदिवितेभ्यःसर्पेभ्योनमः ॥ ९ ॥ ओंभूर्भुवःस्वः
आश्लेषेइहागच्छेहतिष्ठ पितृभ्यःपितृदैवतं ओंपितृभ्यःस्वधायिभ्यःस्वधानमः पि
तामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः ॥
अक्षन्नपितरोमीमदंतपितरोतीतृपंतपितरःपितरःशुंधध्वम् ॥ १० ॥ ओंभूर्भुवःस्वः
मघेइहागच्छेहतिष्ठभगप्रणेतिभाग्यंतु ओंभगप्रणेतर्भगसत्यराधोभगेमांधियमुद
वाददन्नःभगप्रणोजनयगोभिरश्वैर्भगप्रनृभिर्नृवंतःस्याम ॥ ११ ॥ ओंभूर्भुवःस्वःपू
र्वाफाल्गुनीहागच्छेहतिष्ठ दैव्यावध्वर्युरार्यमं ओंदैव्याध्वर्यूआगतꣳरथेनसूर्यत्व
चामध्वायज्ञꣳसमंजायेतम्प्रक्तनथायंवेनश्चित्रन्देवानाम् ॥ १२ ॥ ओंभूर्भुवःस्वःउ

त्तराफाल्गुनीहागच्छेहतिष्ठ हस्तंविभ्राड्मंत्रेण ओंविभ्राड्बृहत्पिबतुसोम्यंमध्वायु र्दधद्यज्ञपतावविन्हुतम् ॥ वातजूतोयोअभिरक्षतित्मनाप्रजाःपुपोषपुरुधाविराजति ॥ १३ ॥ओंभूर्भुवःस्वःहस्तइहागच्छइहतिष्ठ चित्रात्वष्टातुरीयत ओंत्वष्टातुरीयोऽ अद्भुतऽइन्द्राग्नीपुष्टिवर्द्धना ॥ द्विपदाच्छन्दऽइंद्रियंमुक्षागौर्नवयोदधुः ॥ १४ ॥ ओंभूर्भुवःस्वःचित्रेइहागच्छेहतिष्ठ इतिदक्षिणस्यांस्थाप्यानि पीवोअन्नेतिवा यव्यं ओंपीवोअन्नारयिवृधःसुमेधाः श्वेतः सिषक्तिनियुतामभिश्रीः ॥ तेवायवेसम नसोवितस्थुर्विश्वेन्नरःस्वपत्यानिचक्रुः॥ओंभुर्भूवःस्वःस्वातेइहागछेहतिष्ठ १५ इंद्रा ग्नीचद्विदैवतं ओंइंद्राग्नीआगतꣳसुतंगीर्भिर्नभोवरेण्यं अस्यपातंधियेषिता १६ओं भूर्भुवः स्वःविशाखेइहागच्छेहतिष्ठनमोमित्रेतिमैत्रंओंनमोमित्रस्यवरुणस्यचक्षसे

महोदेवायतद्दतर्ठंसपर्य्यंत दूरेद्दशोदेवजातायकेतवेदिवस्पुत्रायसूर्यायशर्ठंसत १७
ओंभूर्भुवःस्वः मैत्रइहागच्छेहतिष्ठ सइषुहस्तैःपुरंदरं ओंसइषुहस्तैःसनिषङ्गिभिर्व्व
शीसंस्रष्टासयुधइंद्रोगणेन सर्ठंसृष्टजित्सोमपाबाहुशर्द्ध्यूग्रधन्न्वाप्रतिहिताभिर
स्ता१८ओंभूर्भुवःस्वःज्येष्ठेइहागच्छेहतिष्ठ मूलंमातेवपुत्रंच॥ओंमातेवपुत्रंपृथिवी
पुरीष्यमग्निंस्वेयोनावभारुषा ॥ तांविश्वैर्देवैर्ऋतुभिःसंविदानःप्प्रजापतिर्विश्वक
र्मांविमुंचतु१९ओंभूर्भुवःस्व मूलइहागच्छेहतिष्ठ पूर्वाषाढामपाघमःओंअपाघम
पकिल्बिषमपकृत्यामपोरपःअपामार्गत्वमस्मदपदुःष्वप्न्यर्ठंसुव२०ओंभूर्भुवःस्वः
पूर्वाषाढेइहागच्छेहतिष्ठ विश्वेअद्येतिविश्वेशं ओंविश्वेऽअद्यमरुतोविश्वऊती
विश्वेभवंत्वग्नयःसमिद्धाः ॥ विश्वेनोदेवाऽअवसागमंतुर्विश्वमस्तुद्रविणंवाजोऽअस्मे

२१ ओंभूर्भुवः स्वः उत्तराषाढेइहागच्छेहतिष्ठ इतिप्रतीच्यांस्थाप्यानि ॥ गायत्र्या भिजितंन्यसेत् ओंतत्सवितुर्वरेण्यंभर्ग्गोदेवस्यधीमहि धियोयोनःप्रचोदयात् ॥२२॥ ओंभूभुर्वःस्वःअभिजित्इहागच्छेहतिष्ठ श्रवणंविष्णुमंत्रेण ओंइदंविष्णुर्विचक्रमेत्रेधानिदधेपदं समूढमस्यपांसुरे २३ ओंभूर्भुवःस्वःश्रवणइहागच्छेहतिष्ठवसोर्मंत्रेणावासवं ओंवसोःपवित्रमसिशतधारं वसोःपवित्रमसिसहस्रधारम् ॥देवस्त्वासविता पुनातुवसोःपवित्रेणशतधारेणसुप्वाकामधुक्ष २४ओंभूर्भुवःस्वःधनिष्ठेइहागच्छेहतिष्ठ शतभिषांवरुणस्येति ओंवरुणस्योत्तंभनमसिवरुणस्यस्कंभसर्ज्जनीस्थोवरुणस्यऽऋतसदन्यसिवरुणस्यऽऋतसदनमसिवरुणस्यऋतसदनमासीद ॥२५॥ ओंभूर्भुवःस्वः शतभिषेइहागच्छेहतिष्ठ उतनोह्यजपादभं उतनोहिर्बुध्न्यः शृणोत्वजऽए

कपातूपृथिवीसमुद्रः विश्वेदेवाऋतावृधोहुवानास्तुतामंत्राः कविशस्ताऽअवंतु ॥२६॥
ॐभूर्भुवःस्वःअजपादभइहागच्छेहतिष्ठ शिवोनामेत्यहिर्बुध्न्यं ॐशिवोनामासि
स्वधितिस्तेपितानमस्तेअस्तुमामाहिंसीः निवर्त्तयाम्यायुषेन्नाद्यायप्रजननायरा
यस्पोषायसुप्रजास्त्वायसुवीर्याय ॥२७॥ ॐभूर्भुवःस्वःअहिर्बुध्न्यइहागच्छेहतिष्ठ
पौष्णंपूषंतवेनतु ॐपूषंतवव्रतेवयन्नरिष्येमकदाचन स्तोतारस्तऽइहस्मसि ॥२८॥
ॐभूर्भुवः स्वः रेवतिइहागच्छेहतिष्ठ इतिनक्षत्रस्थापनं ॥ २८ ॥ योगेयोगेतिईशा
न्यांयोगानेवैकपुंजके ॐयोगेयोगेतवस्तरं वाजेवाजेहवामहे सखायऽइंद्रमूतये॥१॥
ॐभूर्भुवःस्वःयोगाःइहागच्छध्वमिहतिष्ठध्वं ॥२७॥ भद्रंकर्णेतिमंत्रेणकर्णानम्नौप्रपू
जयेत् ॐभद्रंकर्णेभिः शृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः स्थिरैरंगैस्तुष्टुवांसस

स्तनूभिर्व्यशेमहिदेवहितंय्यदायुः ॥१॥ ओंभूर्भुवःस्वः करणाइहागच्छध्वमिहतिष्ठ
ध्वं ॥११॥ ध्रुवीतिध्रुवंमध्येग्रहाणांचसतारकं ओंध्रुवासिध्रुवोयंयजमानोस्मिन्नायत
नेप्रजयापशुभिर्भूयात् घृतेनद्यावापृथिवीपूर्येथामिंद्रस्यच्छदिरसिविश्वजनस्यच्छा
या ॥१॥ ओंभूर्भुवःस्वः सतारकध्रुवइहागच्छेहतिष्ठ आदित्यमंडलेचैववामेचैवाधि
देवयोः पंचनद्येतिसरितः पत्रबाह्येतुपश्चिमे ओंपंचनद्यः सरस्वतीमपियंतिसस्रोत
सःसरस्वतीतुपंचधासोदेशेभवत्सरित्॥१॥ओंभूर्भुवःस्वःसरितइहागच्छध्वमिहति
ष्ठध्वं गुरुमार्तंडयोर्मध्येसप्तर्षयेतिवैऋषीन् ओंसप्तऋषयःप्रतिहिताः शरीरेसप्तरक्षं
तिसदमप्रमादम् सप्तापःस्वपतोलोकमीयुस्तत्रजाग्रतोअस्वप्नजौसत्रसदौचदेवौ ॥
ओंभूर्भुवःस्वः सप्तऋषयइहागच्छध्वमत्रतिष्ठध्वं इमंमेसागरान्सप्तसरितोधःप्रपू

जयेत् ओंइमंमेवरुणश्रुधीहवमद्याचमृडय त्वामवस्युराचके ओंभूर्भुवःस्वःसागराइ
हागच्छध्वमत्रातिष्ठध्वं प्रपर्वतेतिमंत्रेणपर्वतानुत्तरेयजेत् पंक्तिनक्षत्रयोर्मध्येपत्रबा
ह्येतथैवच ओंप्रपर्वतस्यवृषभस्यपृष्ठान्नावश्चरंतिस्वसिचइयानाः ताऽआववृत्रन्नध
रागुदक्ताअहिर्बुध्न्यमनुरीयमाणाः विष्णोर्विक्रमणमसिविष्णोर्विक्रांतमसिविष्णोः
क्रांतमसि॥१॥ओंभूर्भुवःस्वःपर्वतागइहागच्छध्वमत्रतिष्ठध्वं जवोजस्तेतिरैवंतंस्थाप
येत्सूर्य्यतोप्यधःओंऽजवोजस्तेवाजिन्निहितोगुहायःश्येनेपरीतोअचरच्चवातेतेननो
वाजिन्बलवान्बलेनवाजजिच्चभवशमनेचपारयिष्णुः ॥ वाजिनोवाजतितोवाजरंठ
सरिष्यन्तोबृहस्पतेर्भागमवजिघ्रत ॥ ८ ॥ ओंभूर्भुवःस्वःरैवंतइहागच्छेह
तिष्ठ सुपर्णोसीतिगरुडंउत्तरेबुधमंडले ओंसुपर्णोसिगरुत्मांस्त्रिवृत्तेशिरोगायत्रंच

क्षुर्बृहद्रथंतरेपक्षौ॥स्तोमऽआत्माछंदाꣳस्यंगानियजूꣳषिनाम सामतेतनूर्वामदेव्यं यज्ञायज्ञियंपुच्छंधिष्ण्याः शफाःसुपर्णोसिगरुत्मांदिवंगच्छस्वः पत॥१॥ओंभूर्भुवः स्वःगरुडइहागच्छेहतिष्ठ अत्रावसरेरुद्रकलशस्थापनं भूरसीतिभूमिप्रार्थना ॥ ओं भूरसिभूमिरस्यदितिरसिविश्वधाया विश्वस्यभूवनस्यधर्त्री पृथिवींयच्छपृथिवींदृꣳहपृथिवींमाहिꣳसीःमहीद्यौरितिधान्याधारंकृत्वा ओंमहीद्यौःपृथिवीचनऽइमंय्यज्ञं मिमिक्षताम् पिपृतान्नोभरीमभिः१आजिघ्रकलशमितिकलशस्थापनंओंआजिघ्रक लशम्मह्यात्वाविशंत्विंदवः पुनरूर्ज्जानिवर्त्तस्वसानः सहस्रंधुक्ष्वोरुधारापयस्वतोपु नर्म्माविशताद्रयिः ॥ १ ॥ वरुणस्योत्तमित्यपःपूर्य ओंवरुणस्योत्तंभनमसिवरुण स्यस्कंभसर्ज्जनीस्थोवरुणस्यऋतसदन्यसिवरुणस्यऋतसदनमसिवरुणस्यऽऋतस

दनमासीद॥१॥याऽओषधिरितिसर्वौषधीः प्रक्षि० ओंयाऽओषधीः पूर्वाजातादेवेभ्य
स्त्रियुगंपुरा मनैनुबभ्रूणामहर्ठंशतंधामानिसप्तच॥१॥धान्यमसीतिधान्यं ओंधान्य
मसिधिनुहिदेवान्प्राणायत्वोदानायत्वाव्यानायत्वा दीर्घामनुप्रसितिमायुषेधान्देवो
वः सविताहिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेणपाणिना॥ चक्षुषेत्वामहीनाम्पयोसि
॥ १ ॥ अश्वत्थेवेतिपंचपल्लवं अश्वत्थोदुंबरप्लक्षचूतन्यग्रोधपल्लवाः पंचपल्लव०
ओंअश्वत्थेवोनिषदनंपर्ण्णेवोव्वसतिष्कृता गोभाजऽइत्किलासथयत्सनवथपूरुषम्॥
याःफलिनीतिफलं ओंयाः फलिनीर्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः बृहस्पतिप्र
सूतास्तानोमुंचंत्वर्ठंहसः हिरण्यगर्भेतिहिरण्यं ओंहिरण्यगर्भःसमवर्त्ततताग्रेभूतस्य
जातः पतिरेकआसीत् सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम॥१॥ पू

र्णादर्वीत्युपरिष्टात्पूर्णपात्रं ओंपूर्णादर्विपरापतसुपूर्णापुनरापत वस्नेवविक्रीणावहा
इषमूर्जᳫंशतक्रतो॥१॥याःफलिनीतिश्रीफलं ओंयाःफलिनीर्याऽअफलाअपुष्पाया
श्चपुष्पिणीः बृहस्पतिप्रसूतास्तानोमुंचंत्वᳫंहसः॥१॥सुजातोज्योतिषेतिवस्त्रेणावे
ष्टनं ओंसुजातोज्योतिषासहशर्म्मवरुथमासदत्स्वःवासोअग्नेविश्वरूपᳫंसंव्ययस्व
विभावसो ॥ १ ॥ असंख्यातेतिसंपूज्योरुद्रोरुद्रघटांभसिओंअसंख्यातासहस्राणिये
रुद्राअधिभूम्याम् तेषांᳫंसहस्रयोजनेवधन्वानितन्मसि ॥ १ ॥ ओंभूर्भुवःस्वःरुद्रइ
हागच्छेहतिष्ठ प्रजापतेरग्रभागेशनिमंडलकेशुभे पूज्योविष्णुःस्वसूक्तेनषोडशार्चेन
तत्रवै ॥ १ ॥ विष्णुसूक्तस्तुषोडशकंडिकात्मकः ओंसहस्रशीर्षापुरुषः सहस्राक्षः
सहस्रपात् सभूमिᳫंसर्वतस्पृत्वात्यतिष्ठद्दशांगुलम् इत्यादि ॥ १६ ॥ ओंभूर्भुवः

स्वःविष्णोइहागच्छेहतिष्ठ वास्तोष्पतेतिमंत्रेणवास्तुंवैराहुमंडले ओंवास्तोष्पतेप्र
तिजानीह्यस्मान्स्वावेशोअनमीवोभवानः यत्त्वेमहेप्रतितन्नोजुखस्वशन्नोअस्तुद्वि
पदेशंचतुष्पदे ॥१॥ अमीवहावास्तोष्पतेविश्वारूपाण्याविशन् सखासुशेवएधिनः
॥२॥ ओंभूर्भुवःस्वः वास्तोष्पतेइहागच्छेहतिष्ठ गणानांत्वेतिवायव्यांगणेशंकेतुमं
डलेओंगणानांत्वेति०॥१॥ओंभूर्भुवःस्वःगणेशइहागच्छेहतिष्ठ ग्रहाग्नेयांसोमदले
रुद्राण्याअग्रभागतःनमोस्तुसर्पेभ्यइतिक्षेत्रपालंप्रपूजयेत् ओंनमोस्तुसर्पेभ्योयेके
चपृथिवीमनुजेअंतरिक्षेजेदिवितेभ्यःसर्पेभ्योनमः॥१॥ओंभूर्भुवःस्वः क्षेत्रपालइहा
गच्छेहतिष्ठ रुद्रकुंभाग्रतःपूज्याचामुंडाजातवेदसे ओंजातवेदसेसुनवामसोममरा
तीयतोनिदहातिवेदःसनःपरिषदातिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः॥१॥ओं

भूर्भुवःस्वःचामुंडेइहागच्छेहतिष्ठग्रहाद्दक्षिणदिग्भौमसदनेषण्मुखादधःयोवःशिवे
तिगौर्यादिमातरश्चैवपूजयेत् ओंयोवःशिवतमोरसस्तस्यभाजयतेहनः उशतीरिव
मातरः॥१॥ओंभूर्भुवःस्वःगौर्यादिमातरइहागच्छध्वमत्रतिष्ठध्वं अथवेदस्थापनं सू
र्याच्चपूर्वदिग्भागेअग्निमिळेऋचाननःओंअग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजंहोता
रंरत्नधातमं१ओंभूर्भुवःस्वःऋग्वेदइहागच्छेहतिष्ठइषेत्वेतियजुर्वेदंसूर्य्याद्दक्षिणतो
न्यसेत् ओंइषेत्वोर्जेत्वावायवस्थोपायवस्थदेवोवः सविताप्रार्पयतुश्रेष्ठतमायकर्मण
ऽआप्यायध्वमघ्न्याऽइंद्रायभागं प्रजावतीरनमीवाअयक्ष्मामावस्तेनऽईशतमाघस
ठंसोध्रुवाऽअस्मिन्गोपतौ स्यातबह्वीर्यजमानस्यपशून्पाहि।२।ओंभूर्भुवःस्वःयजु
र्वेदइहागच्छेहतिष्ठ सूर्याच्चपश्चिमेसामअग्नआयाहिमंत्रतः ओंअग्नआयाहिवीत

येगृणानोहव्यदातयेनिहोतासत्सिबर्हिषि ३ ओंभूर्भुवःस्वःसामवेदइहागच्छेहतिष्ठ
रवेरुत्तरदिग्भागेशन्नोदेवीत्यथर्वणं ओंशन्नोदेवीरभिष्टयआपोभवंतुपीतये शंय्यो
रभिस्रवंतुनः ॥ ४ ॥ ओंभूर्भुवःस्वःअथर्वणइहागच्छेहतिष्ठ अथदिक्पालस्थापनं ॥
इंद्रादितःक्रमाद्दिक्षुरिंद्रादीनष्टपूजयेत् इंद्रोवह्निःपितृपतिर्नैऋतोवरुणोमरुत् कुबेरई
शःपतयःपूर्वादीनांदिशांक्रमात् अंतरिक्षंपूर्वभागेधरापूज्यातुपश्चिमे इंद्रंत्रातारमं
त्रेणओंत्रातारमिंद्रमवितारमिंद्रꣳहवेहवेसुहवꣳशूरमिंद्रं व्हयामिशक्रम्पुरुहूतमिं
द्रꣳस्वस्तिनोमघवाधात्विंद्रः॥१॥एह्येहिसर्वामरसिद्धसाध्यैरभिष्टुतोवज्रधरामरेश
संवीज्यमानोप्सरसांगणेनरक्षाध्वरंनोभगवन्नमस्ते ॥ २ ॥ ओंभूर्भुवःस्वःइंद्रइहा
गच्छेहतिष्ठ त्वन्नोअग्नेहुताशनं ओंत्वन्नोऽअग्नेतवदेवपायुभिर्मघोनोरक्षतन्वश्चवंद्य

ग्र० शां० ॥४०॥

त्रातातोकस्यतनयेगवामस्यनिमेषरक्षमाणस्तवव्रते ॥ २ ॥ एह्येहिसर्वामररुद्रसंघैर्मुनिप्रवीरैरभितोभिजुष्ट तेजोवतालोकबलेनसार्द्धंरक्षाध्वरन्नोभगवन्नमस्ते।२।ओंभूर्भुवःस्वः अग्नेइहागच्छेहतिष्ठ यमंसुगन्नुपंथोति ओंसुगन्नुपंथांप्रदिशन्नएहिज्योतिष्मध्येह्यजरन्नआयुः अपैतुमृत्युरमृतंमआगाद्वैवस्वतोनोअभयंकृणोतु ॥ ३ ॥ एह्येहिवैवस्वतधर्मराजसर्वामरैरर्चितधर्ममूर्तिः शुभाशुभानांफलभावनस्त्वंशिवायनःपाहिमखंनमस्ते ॥ ३ ॥ ओंभूर्भुवःस्वः यमइहागच्छेहतिष्ठ असुन्वंतेतिनैर्ऋतिं ओंअसुन्वंतमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य अन्यस्मदिच्छसातइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥४ ॥ एह्येहिरक्षोगणनायकस्त्वंविशालवेतालपिशाचसंघैः ममाध्वरंपाहिशुभादिनाथलोकेश्वरस्त्वंप्रणमामिनित्यं ॥४॥ ओंभूर्भुवःस्वः

पद्ध० ॥४०॥

निर्ऋतेइहागच्छेहतिष्ठ तत्वायामिजलाध्यक्षं ओंतत्वायामिब्रह्मणावंदमानस्तदा
शास्तेयजमानोहविर्भिः अहेडमानोवरुणेहबोध्युरुशर्ठंसमानऽआयुःप्रमोषीः॥१॥
एह्येहियादोगणवारिधीनांगणेनमेघेनसहाप्सरोभिः विद्याधरेंद्रामरगीयमानः पा
हित्वमस्मान्भगवन्नमस्ते ॥ ५ ॥ ओंभूर्भुवः स्वः वरुणइहागच्छेहतिष्ठवायुमानो
नियुद्भिना ओंआनोनियुद्भिःशतिनीभिरध्वरर्ठंसहस्रिणीभिरुपयाहियज्ञम् वायोअ
स्मिंत्सवनेमादयस्वयूयंपातस्वस्तिभिः सदानः१ एह्येहियज्ञेममरक्षणायमृगाधिरू
ढःसहसिद्धसंघैः प्राणाधिपोहव्यभुजःसहायगृहाणपूजांभगवन्नमस्ते ॥६॥ ओंभूर्भु
वःस्वःवायोइहागच्छेहतिष्ठ॥ वयंसोमेतिधनदं ओंवयर्ठंसोमव्रतेतवमनस्तनूषुबि
भ्रतः प्रजावंतःसचेमहि ॥१॥ एह्येहियज्ञेश्वरयज्ञरक्षांविधत्स्वनक्षत्रगणेनसार्द्धं स

वौषधीभिः पितृभिः सहैवगृहाणपूजांभगवन्नमस्ते ॥ ७ ॥ ओंभूर्भुवःस्वःधनदइहा गच्छेहतिष्ठ तमीशानेतिशंकरं ओंतमीशानंजगततस्थुषस्पतिंधियञ्जिन्वमवसेहू महेव्वयम् पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये ॥ १ ॥ एह्येहिविश्वेश्वरनस्त्रिशूलकपालखट्वांगवरेणसार्द्धं लोकेशभूतेश्वरयज्ञसिद्ध्यैगृहाणपूजांभगवन्नमस्ते ८ ओंभूर्भुवःस्वः शंकरइहागच्छेहतिष्ठ अस्मेरुद्रेत्यंतरिक्षं ओंअस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाःयः शंर्ठसतेस्तुवतेधायिपज्रइंद्रज्येष्ठाअस्मांअवंतुदेवाः ॥१॥ एह्येहिविश्वाधिपतेमुनींद्रलोकेनसार्द्धंपितृदेवताभिः सर्वस्यधातात्वमनंतकीर्तीरक्षाध्वरंनःसततंशिवाय९॥ओंभूर्भुवःस्वःब्रह्मन्निहागच्छेहतिष्ठ स्योना पृथिविनोधरां ओंस्योनापृथिविनोभवानृक्षरानिवेशनीयच्छानः शर्मसप्रथाः ॥१॥

एह्येहिपातालधरानगेंद्रनागांगनाकिन्नरगीयमानः रक्षोरगेंद्रामरलोकसार्द्धमनंत रक्षाध्वरमस्मदीयं ॥१०॥ ओंभूर्भुवः स्वः धराधिपतेअनंतइहागच्छेहतिष्ठ अथच तुःषष्टियोगिनीनामावाहनं आग्नेय्यांयोगिनींन्यसेदित्युक्तेः अग्नावेकपुंजकेवाचतुः षष्टिदलात्मकेभिन्नमंडलेस्थापयेत् ॐ आवाहयाम्यहंदेवींयोगिनींपरमेश्वरीं योगाभ्यासेनसंतुष्टांपरध्यानसमन्वितां ॥ १ ॥ दिव्यज्वालातिसंकाशादिव्यज्वालातिलोचना मूर्तिमतीअमूर्ताचउग्राचैवोग्ररूपिणी ॥२॥ यज्ञंकुर्वंतुनिर्विघ्नंश्रेयोयच्छंतुमातरः ॥ दिव्ययोगीमहायोगीसिद्धियोगीगणेश्वरी ॥ ३ ॥ प्रेताक्षीडाकिनीकालीकालरात्रिर्निशाचरी ॥ हुंकारीसिद्धिवैतालीखर्परीभूतयामिनी ॥४॥ उर्द्ध्वकेशीविरूपाक्षीशुष्कांगीमांसभोजिनी ॥ फेत्कारीवीरभद्राक्षीधूम्राक्षीकलहाप्रिया ॥ ५ ॥ रक्ताच

घोररक्ताक्षीविपारूक्षीभयंकरी ॥ चौरिकामारिकाचंडीवाराहीमुंडधारिणी ॥ ६ ॥ भैरवीचक्रिणीक्रोधादुर्मुखीप्रेतवाहिनी ॥ कंटकीदीर्घलंबोष्ठीमालिनीमंत्रयोगिनी ॥७॥ कालाग्निमोहिनीचक्रीकंकालीभुवनेश्वरी ॥ कुंडलाक्षीलुहीलक्ष्मीयमदूतीकरालिनी ॥ ८ ॥ कौशिकीभक्षणीयक्षीकौमारीयंत्रवाहिनी ॥ विशालाकामुकीव्याघ्रीयक्षणीप्रेतभूषणी ॥ ९ ॥ धूर्जटीविकटीघोराकपालीचैवलांगली ॥ चतुःषष्टिःसमाख्यातायोगिन्योहिवरप्रदाः ॥ १० ॥ त्रैलोक्येपूजितानित्यंदेवमानवयोगिभिः ओंभूर्भुवःस्वः योगिन्यः इहागच्छंत्विहातिष्ठंतु मध्येतुपंचभूतानिविश्वकर्माणमेवच ओंभूतायित्वानारातयेस्वरभिविष्येस्वंदृंहंतांदुर्याःपृथिव्यामुर्व्यंतरिक्षामन्वेमिपृथिव्यास्त्वानाभौसादयाम्यादित्याउपस्थेग्नेहव्यंरक्ष ॥ १ ॥ ओंभूर्भुवःस्वःपंचभूतानिइहागच्छं

त्विहतिष्ठंतु ओंविश्वकर्मन्हविषावर्द्धतेनत्रातारमिंद्रमकृणोरवध्यंतस्मैविशः समन
मंतपूर्वीरयमुग्रो विहव्योयथासत ॥१॥ ओंभूर्भुवःस्वः विश्वकर्मन्निहागच्छेहतिष्ठ
ततस्तेषांप्रतिष्ठांकुर्यात् अक्षतानादाय ॐतदस्तुमित्रावरुणातदग्नेशंय्योरस्मभ्य
मिदमस्तुशस्तं ॥ अशीमहिगाधमुतप्प्रतिष्ठान्नमोदिवेबृहतेसादनाय ॥ १ ॥ ओंम
नोजूतिर्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमंतनोत्वरिष्टंयज्ञंसमिमंदधातु विश्वदेवा
सऽइहमादयंतामों३प्रतिष्ठ ॥ २ ॥ मनोजूतिर्जुषतामाज्यस्येतिमनसावाइदंसर्वमा
प्तन्तन्मनसैवैतत्सर्वमाप्नोतिबृहस्पतिर्यज्ञमिमंतनोत्वरिष्टंयज्ञंसमिमंदधात्विति
यद्विवृढंतत्संदधातिविश्वेदेवासऽइहमादयंतामितिसर्वंवैविश्वेदेवाः ॥ सर्वेणैवैतत्सं
दधातिसयदिकामयेद्ब्रूयात्प्रतिष्ठेति ॥ ३ ॥ एषवैप्रतिष्ठानामयज्ञोयत्रैतेनयज्ञेनय

जंते ॥ सर्वमेवप्रतिष्ठितंभवतु॥ ४ ॥ आदित्यादिनवग्रहाःस्थापितदेवतारुद्रकलश
सहिताः सुप्रतिष्ठावरदाभवंतु ॥ इत्यक्षतान्विकीर्ययजमानःपूजांकुर्यात् ॥ तत्र
ओंअद्येत्यादिमासेपक्षेतिथौवासरे अमुकगोत्रोमुकशर्मावर्मागुप्तोवाहंसकलशुभफ
लप्राप्तिकामःआदित्यादिनवग्रहाणांस्थापितदेवतानांचलघुपूजनंकरिष्ये॥सूर्यादि
नवग्रहेभ्यःस्थापितदेवताभ्योनमःआसनं पाद्यं अर्घ्यं आचमनं स्नानं वस्त्रं उपवीतं
गंधं ओंगंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं॥इश्वरींसर्वभूतानांतामिहोपव्हयेश्रियं
॥ अक्षतान् ओंअक्षन्नमीमदंतह्यवप्रियाअधूषत अस्तोषतस्वभानवोविप्रानविष्ठ
यामतीयोजान्विंद्रतेहरी ॥ १ ॥ पुष्पाणि नानाविधानिदिव्यानिऋतुकालोद्भवानिच
॥ मयार्पितानिपुष्पाणिपूजार्थंप्रतिगृह्यतां ॥ १० ॥ धूपं ओंधूरसिधूर्वंधूर्वंतंधूर्वंतंयो

स्मान् धूर्वतितंधूर्वयंवयंधूर्वाम: देवानामसिवन्हितमठंसस्नितमंपप्रितमंजु
ष्टतमंदेवहूततमम् ॥११॥दीपं ओंअग्निर्ज्योतिर्ज्योतिरग्नि:स्वाहासूर्योज्योतिर्ज्योति:
सूर्य:स्वाहा ॥ अग्निर्वर्चोज्योतिर्वर्च:स्वाहा: सूर्य्योवर्चोज्योतिर्वर्च्च:स्वाहा ज्योति:
सूर्य्य: सूर्योज्योति: स्वाहा ॥१२॥ नैवेद्यं अन्नंचतुर्विधंस्वादुरसै:षड्भि: समन्वितं॥
भक्ष्यभोज्यसमायुक्तंगृह्यतांममभक्तित:॥१३॥आचमनं नागवल्लीदलंदिव्यंपूगीकर्पू
रसंयुतं॥ वक्त्रंसुरभिकृत्स्वादुतांबूलंप्रतिगृह्यतां ॥१॥ फलं ओंया:फलिनीर्याअफला
अपुष्पायाश्चपुष्पिणी: बृहस्पतिप्रसूतास्तानोमुंचंत्वठंहस:॥ १४॥ दक्षिणांओंहि
रण्यगर्भ: समवर्त्तताग्रेभूतस्यजात:पतिरेकआसीत् सदाधारपृथिवींद्यामुतेमांक
स्मैदेवायहविषाविधेम॥ १५॥ नमस्कार: ग्रहाराज्यंप्रयच्छंतिग्रहाराज्यंहरंतिच ॥

ग्रहैस्तुव्यापितंसर्वंत्रैलोक्यंसचराचरं॥१६॥अद्यपूर्वोच्चरितविशेषणविशिष्टायांपु
ण्यतिथौनवग्रहाणांस्थापितदेवतानांचकृतस्यलघुपूजनविधेर्यन्न्यूनमतिरिक्तंतत्स
र्वंभवतांब्राह्मणानांवचनात्श्रीगणेशांबिकयोःप्रसादात्परिपूर्णमस्तु॥इतिग्रहस्थाप
नपूजनं अथव्रतोद्यापनादिकार्यविशेषेसर्वतोभद्रमंडलंनिर्मायतद्देवता आवाह्यसं
पूज्यच तन्मध्येहेमराजतताम्रमृण्मयान्यतमंकुंभंपंचरत्नाद्युपेतंस्थापयेत् तद्यथा
भूरसीतिभूमिप्रार्थना महीद्यौरितिधान्याधारंकृत्वा आजिघ्रमितिकलशं वरुणस्यो
त्तंमितिजलं याऽओषधीरितिसर्वौषधिप्रक्षेपः धान्यमसीतिधान्यं अश्वत्थेवेतिपंच
पल्लवान् याःफलिनीतिफलं हिरण्यगर्भेतिहिरण्यं सुजातोज्योतिषेतिवस्त्रेणावेष्ट
नं तदुपरिपूर्णादर्वीतितंडुलोपेतंताम्रपात्रंनिधायतस्मिन्प्रधानप्रतिमांस्थापयेत्॥

स्वर्णादिनाप्रधानप्रतिमांनिर्माय्याग्न्युत्तारणंकृत्वातद्यथामूर्तौघृतंकृत्वावस्त्रेणावेष्ट्य
कुशेनस्पृष्ट्वामंत्रान्पठेत् ॥ ओंसमुद्रस्यत्वावकयाग्नेपरिव्ययामसिपावकोअस्मभ्य
ठंशिवोभव ॥ १ ॥ हिमस्यत्वाजरायुणाग्नेपरिव्ययामसिपावको ऽअस्मभ्यठंशि
वोभव ॥ २ ॥ उपज्मन्नुपवेतसेवतरनदीष्वा ॥ अग्नेपित्तमपामसिमंडूकिताभिराग
हियेमन्नोयज्ञम्पावयवर्णठंशिवंकृधि ॥ ३ ॥ अपामिदंन्ययनठंसमुद्रस्यनिवेशन
म् ॥ अन्यांस्तेअस्मत्तपंतुहेतयः पावकोअस्मभ्यठंशिवोभव ॥ ४ ॥ अग्नेपावकरो
चिषामंद्रयादेवजिव्हया ॥ आदेवान्वक्षियक्षिच ॥ ५॥ सनःपावकदीदिवोग्नेदेवाँ२
इहावह ॥ उपयज्ञठंहविश्चनः ॥ ६ ॥ पावकयाश्चित्तयंत्याकपाक्षामन्नुरुचउषसो
नभानुना ॥ तूर्वन्नयामन्येतशस्यनूरणऽआयोघृणेनततृषाणोऽजरः ॥ ७॥ नमस्ते

हरसेशोचिषेनमस्तेअस्त्वर्चिषे ॥ अन्यांस्तेअस्मत्तपंतुहेतयःपावकोअस्मभ्यर्ठं शिवोभव ॥ ८ ॥ ततोजलेनप्रक्षाल्यप्राणप्रतिष्ठांकुर्यात् प्रतिमायाः कपोलौदक्षिण पाणिनास्पृष्ट्वामंत्राः पठनीयाः प्राणप्रतिष्ठामंत्रस्यविष्णुरुद्रौऋषी ऋग्यजुःसामा निछन्दांसिप्राणाख्यादेवताओंआंबीजंह्रींशक्तिः क्रौंकीलकंयंरंलंवंशंषंसंहंहंसः ए ताःशक्तयः मूर्तिप्रतिष्ठापनेविनियोगः ओंआंह्रींक्रौंयंरंलंवंशंषंसंहंहंसः देवस्यप्रा णाइह पुनरुच्चार्यदेवस्यसर्वेंद्रियाणिइहपुनरुच्चार्यदेवस्यत्वक्पाणिपादपायूपस्थादी निइह पुनरुच्चार्यदेवस्यवाङ्मनश्चक्षुः श्रोत्रप्राणाइहागत्यसुखेनचिरंतिष्ठंतुस्वाहा ॥ ९ ॥ प्राणप्रतिष्ठांविधायध्यायेत् एवंप्राणप्रतिष्ठांकृत्वाषोडशोपचारैः पूजयेत् आवाहनं॥ आगच्छागच्छदेवेशतेजोराशेजगत्पते॥क्रियमाणांमयापूजांगृहाणसुर

सतम ॥ १ ॥ आसनं नानारत्नसमायुक्तंकार्त्तस्वरविभूषितं ॥ आसनंदेवदेवेशप्री
त्यर्थंप्रतिगृह्यतां ॥ २ ॥ पाद्यं नमोनमस्तेदेवेशनमस्तेपुरुषोत्तम ॥ नमस्तेसर्वरू
पायपाद्यंनःप्रतिगृह्यतां ॥ ३ ॥ अर्घ्यं नमस्तेदेवदेवेशनमस्तेधरणीधर ॥ नमस्तेकम
लाकांतअर्घ्यंनः प्रतिगृह्यतां ॥ ४ ॥ आचमनं कर्पूरवासितंतोयंमंदाकिन्याः समा
हृतं ॥ आचम्यतांजगन्नाथमयादत्तंहिभक्तितः ॥५॥ स्नानं ओंवरुणस्योत्तंभनमसि
वरुणस्यस्कंभसर्जनीस्थोवरुणस्यऋतसदन्यसिवरुणस्यऋतसदनमसिवरुणस्यऋ
तसदनमासीद ॥ ६ ॥ इतिजलस्नानं ओंपयः पृथिव्यांपय ओषधीषुपयोदिव्यंत
रिक्षेपयोधाः ॥ पयस्वतीःप्रदिशःसंतुमह्यम् ॥ ६ ॥ इतिपयःस्नानं ओंदधिक्राव्णो
अकारिषंजिष्णोरश्वस्यवाजिनः। सुरभिनोमुखाकरत्प्रणआयूंषितारिषत् ॥६॥इति

दधिस्नानं ओंघृतंघृतपावानः पिबतवसांवसापावानः पिबतांतरिक्षस्यहविरसिस्वाहा॥दिशःप्रदिशआदिशोविदिशऽउद्दिशोदिग्भ्यःस्वाहा॥६॥इतिघृतस्नानं ओंमधुवाताऋतायतेमधुक्षरंतिसिंधवः॥ माध्वीर्नः संत्वोषधीः॥१॥ मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः॥ मधुद्यौरस्तुनःपिता ॥२॥ मधुमान्नोवनस्पतिर्म्मधुमाꣳअस्तुसूर्यः॥ माध्वीर्गावोभवंतुनः ॥६॥ इतिमधुस्नानं ओंअपाꣳरसमुद्वयसꣳसूर्येसंतꣳसमाहितम् अपाꣳरसस्ययोरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतोसींद्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिंद्रायत्वाजुष्टतमम्॥६॥इतिशर्करास्नानं ओंवसोः पवित्रमसिशतधारंवसोः पवित्रमसिसहस्रधारम्॥ देवस्त्वासवितापुनातुवसोः पवित्रेणशतधारेणसुप्वाकामधुक्षः इतिजलस्नानं ओंपंचनद्यः सरस्वतीमपियंतिस

स्रोतसः ॥ सरस्वतीतुपंचधासोदेशेभवत्सरित् ॥ १ ॥ गंगाचयमुनाचैवगोदावरि
सरस्वती ॥ तापीपयोष्णीरेवाचताभ्यःस्नानार्थमागतं ॥ तोयमेतत्सुखस्पर्शंस्नानाय
प्रतिगृह्यतां ॥ १ ॥ इतिगंगाजलस्नानं सर्वभूषाधिकेदेवलोकलज्जानिवारणे ॥ मयो
पपादितेतुभ्यंवाससीप्रतिगृह्यतां ॥ १ ॥ इतिवस्त्रं दामोदरनमस्तेस्तुत्राहिमांभव
सागरात् ॥ ब्रह्मसूत्रंसोत्तरीयंगृहाणपुरुषोत्तम ॥ १ ॥ इतियज्ञोपवीतं ओंअꣳशुना
तेअपृच्यतांपरुषापरुः ॥ गंधस्तेसोममवतुमदायपरसोअच्युतः ॥ १ ॥ श्रीखंडंचं
दनंदिव्यंगंधाढ्यंसुमनोहरं ॥ विलेपनंसुरश्रेष्ठप्रीत्यर्थंप्रतिगृह्यतां ॥१॥ इतिगंधंओं
अक्षन्नमीमदंतह्यवप्रियाअधूषत ॥ अस्तोखतस्वभानवोविप्रान्नाविष्ठयामतीयोजा
न्विंद्रतेहरी ॥१॥ इत्यक्षतानि ओंकांडात्कांडात्प्ररोहंतीपरुषःपरुषस्परि ॥ एवानोदू

वैंप्रतनुसहस्त्रेणशतेनच ॥ १ ॥ इतिदूर्वा नानाविधानिदिव्यानिऋतुकालोद्भवानि च ॥ मयार्पितानिपुष्पाणिपूजार्थंप्रतिगृह्यतां ॥१॥ इतिपुष्पं ओंधूरसिधूर्वधूर्वंतंधूर्व तंयोस्मानधूर्वतितंधूर्वयंवयंधूर्वामः ॥ देवानामसिवह्नीतमर्ठंसस्नितमंपप्रितमंजुष्ट तमंदेवहूतमम् ॥ वनस्पतिरसोत्पन्नोगंधाढ्योधूपउत्तमः ॥ आघ्रेयःसर्वदेवानां धूपोयंप्रतिगृह्यतां ॥ १ ॥ इतिधूपं ओंअग्निर्ज्योतिर्ज्योतिरग्निःस्वाहासूर्य्योज्योतिर्ज्योतिःसूर्य्यःस्वाहा अग्निर्वर्च्चोज्योतिर्वर्च्चःस्वाहासूर्योवर्चोज्योतिर्वचःस्वाहाज्योतिः सूर्य्यःसूर्य्योज्योतिः स्वाहा ॥ १ ॥ आज्यंचवर्तिसंयुक्तंवह्निनायोजितंमया ॥ दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहं ॥ २ ॥ इतिदीपं अन्नपतेन्नस्यनोधेह्यनमीवस्यसुष्मिणः ॥ प्रप्रदातारंतारिषऊर्ज्जन्नोधेहिद्विपदेचतुष्पदे ॥ १ ॥ अन्नंचतुर्विधंस्वादुरसैः

षड्भिःसमन्वितं ॥ भक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यतां॥२॥इतिनैवेद्यं आचमनं ओंयाःफलिनीर्य्याअफलाऽअपुष्पायाश्चपुष्पिणीः॥ बृहस्पतिप्रसूतास्तानोमुंचंत्व ऽंहसः ॥१॥ इदंफलंमयादेवस्थापितं पुरतस्तव॥ तेनमेसफलावाप्तिर्भवेज्जन्मनिज न्मनि ॥ २ ॥ इतिफलं पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतं ॥ कर्पूरादिसमायुक्तंतांबू लंप्रतिगृह्यतां ॥ १ ॥ इतितांबूलं ओंहिरण्यगर्भःसमवर्त्ततताग्रेभूतस्यजातःपतिरे कऽआसीत् ॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवाहयहविषाविधेम ॥ १ ॥ हिरण्यग र्भगर्भस्थंहेमबीजंविभावसोः ॥ अनंतपुण्यफलदमतःशांतिंप्रयच्छमे ॥ २ ॥ इति दक्षिणां चंद्रादित्यौचधरणीविद्युदग्निस्तथैवच ॥ त्वमेवसर्वज्योतींषिआर्तिक्यंप्रति गृह्यतां ॥ इतिनीराजनं नमस्तेपुंडरीकाक्षनमस्तेह्यमरप्रिय ॥ नमस्तेकमलाकांत

वासुदेवनमोस्तुते ॥ १ ॥ इतिपुष्पांजलिंदद्यात् यानिकानिचपापानिब्रह्महत्यास
मानिच ॥ तानितानिविनश्यंतुप्रदक्षिणपदेपदे ॥ १ ॥ इतिप्रदक्षिणा ॥ नमःसर्वहि
तार्थायजगदाधारहेतवे ॥ साष्टांगोयंप्रणामस्तुप्रयत्नेनमयाकृतः ॥ १ ॥ इतिनम
स्कारः ततोयजमानस्यतिलकंकृत्वाकंकणंबध्नीयात् इतिप्रधानपूजनविधिः ॥ ततः
सिद्धेचरौज्वलत्तृणादिचर्वाज्ययोरुभयोरुपरिभ्रामयित्वावन्हौतत्प्रक्षेपः ततः स्रुवप्र
तपनंत्रिः ततः संमार्जनकुशानामग्रैरंतरतोमूलैर्बाह्यतः स्रुवंसंमृज्यप्रणीतोदकेना
भ्युक्ष्य पुनस्त्रिप्रतप्यदक्षिणतः कुशोपरिनिदध्यात् ततःआज्यमग्नितश्चरोः पूर्वेणा
नीयाग्रेधृत्वा आज्यपश्चिमेनचरुमानीयाज्यस्योत्तरतोनिदध्यात् ततःपवित्राभ्यां
आज्येप्रोक्षणीवदुत्पवनं अवेक्ष्यसत्यपद्रव्येतन्निरसनं ततः पूर्ववत्प्रोक्षण्युत्पवनं

ततउत्थायोपयमनकुशानादाय प्रजापतिंमनसाध्यात्वातूष्णींघृताक्ताः समिधस्ति
स्रः अग्नौक्षिपेत् समिदोभ्यादायस्वाहा अथोपविश्यसपवित्रप्रोक्षणीजलेनसहवि
ष्कमग्निंप्रणीताब्रह्मसहितंप्रदक्षिणक्रमेणपर्युक्ष्य पवित्रेप्रणीतापात्रेधृत्वाप्रोक्षणी
पात्रं स्वस्थानेनिदध्यात् ब्रह्मणान्वारब्धः पातितदक्षिणजानुः स्रुवेणाज्याहुतीर्जुहु
यात् ततः आहुतिचतुष्टयंप्रत्याहुत्यानंतरं स्रुवावस्थितहुतशेषघृतस्यप्रोक्षणीपात्रे
प्रक्षेपः आघारावाज्यभागौतुजुहुयात्पंचवारुणं ॥ समिदाज्यचरोर्होमतिलहोमक्रमे
णच ॥ १ ॥ सर्वत्रहोमाहुतौप्रणवं पूर्वमुच्चार्यस्वाहाकारांतोहोमःकार्यःयथादैवतंचतु
र्थ्यंतंनममेतित्यागंकुर्यात् ततःसमिद्धतमेग्नौ ओंप्रजापतयेस्वाहा इदंप्रजापतयेन
मम ॥ १ ॥ इतिमनसा ओं इंद्रायस्वाहाइदमिंद्रायनमम ॥२॥ इत्याघारौ ओं अग्नये

स्वाहा इदमग्नये ॥ १ ॥ ओंसोमायस्वाहा इदंसोमायनमम ॥ २ ॥ इत्याज्यभागौ
ततोऽनन्वारब्धः स्थालिपाकेनहोमः ओंप्रजापतयेस्वाहाइदंप्रजापतयेनमम इति
मनसा ततोन्वारब्धोजुहुयात् तत्तदाहुत्यनंतरंस्रुवावस्थितहुतशेषस्यप्रोक्षण्यांप्रक्षे
पः शांतिकेवरदनाम्नेवैश्वानरायइदमावाहनंइदमत्रचंदनंचपुष्पं ततो ओंवरुणस्यो
त्तंभनमसिवरुणस्यस्कंभसर्ज्जनीस्थो वरुणस्यऽऋतसदन्यसिवरुणस्यऽऋतसद
नमसिवरुणस्यऋतसदनमासीद १ ओंवरुणायस्वाहाइदंवरुणायनमम अथग्रहा
णांसमिधः अर्कःपलाशः खदिरअपामार्गोंथपिप्पलः ॥ उदुंबरःशमीदूर्वाकुशाश्चस
मिधःक्रमात् १ अलाभेतुप्रकर्त्तव्याःसर्वाःपालाशवृक्षजाः॥प्रतिग्रहंचजुहुयात् शत
मष्टोत्तरंतथा ॥ २ ॥ अष्टाविंशतिरष्टौवायजेत्पंचामृतप्लुताः ॥ प्रथमंप्रत्येकैकाज्याहु

तिंहुत्वापश्चात्प्रत्येकमष्टोत्तरशतसंख्याकाभिरष्टाविंशतिभिरष्टभिर्वातिलधान्याज्या
हुतिभिः समिद्भिर्जुहुयात् ॥ अथहोममंत्राः आकृष्णेतिहिरण्यस्तूपांगिरसऋषिः
सवितादेवतात्रिष्टुप्छंदः आदित्यप्रीतयेतिलधान्याज्यार्कसमिद्धोमेविनियोगः ओं
आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतंमर्त्यंच ॥ हिरण्ययेनसवितारथेनादेवो
यातिभुवनानिपश्यन् ओंआदित्यायस्वाहाइदमादित्याय ॥ १ ॥ ओंइमंदेवाइति
वरुणऋषिः सोमोदेवतासोमप्रीतयेतिलधान्याज्यपालाशसमिद्धोमेविनियोगःओं
इमन्देवाऽअसपत्न्यर्ठं‌सुवध्वम्महतेक्षेत्रायमहतेज्यैष्ठ्यायमहतेजानराज्यायेन्द्रस्ये
न्द्रियाय ॥ इमममुष्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवोमीराजासोमोस्माकं ब्राह्म
णानार्ठं‌राजा ॥ २ ॥ ओंसोमायस्वाहाइदंसोमाय ॥२॥ अग्निर्म्मूर्द्धेतिमंत्रस्यविरूपा

क्षऋषिः अंगारकोदेवतागायत्रीच्छंदः भौमप्रीतयेतिलधान्याज्यखदिरसमिद्धोमे विनियोगः॥ओंअग्निर्मूर्द्धादिवःककुत्पतिःपृथिव्याऽअयम् अपाꣳरेताꣳसिजिन्व ति ३ओंभौमायस्वाहाइदंभौमाय॥३॥उद्बुध्यस्वेतिमंत्रस्यपरमेष्ठीऋषिः बुधोदेवता त्रिष्टुप्छंदः बुधप्रीतयेतिलधान्याज्यापामार्गसमिद्धोमेविनियोगः ओंउद्बुध्यस्वाग्ने प्रतिजागृहित्वमिष्टापूर्तेसꣳसृजेथामयंच॥अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदे वायजमानश्चसीदत ॥ ४ ॥ ओंबुधायस्वाहाइदंबुधाय ॥ ४ ॥ बृहस्पतेतिमं त्रस्यगृत्समदऋषिः बृहस्पतिर्देवतात्रिष्टुप्छंदः बृहस्पतिप्रीतयेतिलधान्याज्य पिप्पलसमिद्धोमेविनियोगः ओंबृहस्पतेअतियदर्य्योऽअर्हाद्युमद्विभातिक्रतुमज्ज नेषुयद्दीदयच्छवसऋतप्रजाततदस्मासुद्रविणंधेहिचित्रम् ओंबृहस्पतयेस्वाहाइदं

बृहस्पतयेनमम ॥ ५॥ अन्नात्परिस्रुतेतिमंत्रस्यअश्विसरस्वतींद्राऋषयः शुक्रोदेव
तातिजगतिछन्दः शुक्रप्रीतयेतिलधान्याज्योदुंबरसमिद्धोमेविनियोगः ओंअन्नात्प
रिस्रुतोरसंब्रह्मणाव्यपिबत्क्षत्रंपयःसोमंप्रजापतिःऋतेनसत्यमिंद्रियंविपानठंशुक्र
मंधसऽइंद्रस्यैंद्रियमिदंपयोमृतंमधु ओंशुक्रायस्वाहाइदंशुक्राय ॥ ६ ॥ शन्नोदेवी
तिमंत्रस्यदध्यङ्आथर्वणऋषिः शनिर्दैवतागायत्रीछंदःशनिप्रीतयेतिलधान्याज्य
शमीसमिद्धोमेविनियोगः ॥ ओंशन्नोदेवीरभिष्टयआपोभवंतुपीतयेशंज्योरभिस्रवं
तुनः ॥ ७॥ ओंशनैश्चरायस्वाहाइदंशनैश्चराय ॥ ७॥ कयानश्चित्रेतिमंत्रस्यवामदे
वऋषिःराहुर्दैवतागायत्रीछंदः राहुप्रीतयेतिलधान्याज्यदुर्वासमिद्धोमेविनियोगः ॥
ओंकयानश्चित्रआभूवदूतीसदावृद्धःसखा कयाशचिष्ठयावृता ॥ ८ ॥ ओंराहवेस्वा

हाइदंराहवे ॥ ८ ॥ केतुंकृण्वन्निति मंत्रस्यमधुछंदाऋषिःकेतुर्देवतागायत्रीछंदः केतुप्रीतयेतिलधान्याज्यकुशसमिद्धोमेविनियोगः ॥ ओंकेतुंकृण्वन्नकेतवेपेशोम र्य्याअपेशसे समुषद्भिरजायथाः ॥ ९ ॥ ओंकेतवेस्वाहाइदंकेतवे ॥ ९ ॥ अन्याश्च तिलाहुतयः ॥ ओंअग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवेदेवाँ२ आसादयादिहस्वाहा ॥ ॥ १ ॥ अप्स्वग्नेसधिष्ठवसौषधीरनुरुध्यसे ॥ गर्भेसंजायसेपुनःस्वाहा ॥ २ ॥ स्यो नापृथिविनोभवानृक्षरानिवेशनीयच्छानःशर्मसप्रथाःस्वाहा ॥३॥ इदंविष्णुर्विचक्र मेत्रेधानिदधेपदम् समूढमस्यपांऽसुरेस्वाहा ॥ ४ ॥ महाँ२ इंद्रोवज्रहस्तःषो डशीशर्मयच्छतुहंतुपाप्मानयोस्मान्द्वेष्टिस्वाहा ॥ ५ ॥ शुक्रज्योतिश्चचित्रज्योतिश्च सत्यज्ज्योतिश्चज्योतिष्मांश्चशुक्रश्चऋतपाश्चात्यंहाःस्वाहा ॥६॥ प्रजापतेनत्वदेता

न्न्यन्योऽविश्वारूपाणिपरिताबभूव यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयꣳस्यामपत
योरयीणाम्स्वाहा ॥ ७ ॥ आयंगौःपृश्निरक्रमीदसदन्मातरंपुरः पितरंचप्रयंत्स्वः
स्वाहा ॥ ८ ॥ ब्रह्मयज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः सबुध्न्याउपमाअ
स्यविष्ठाः सतश्चयोनिमसतश्चविवःस्वाहा ॥ ९ ॥ अथाधिदेवानांमंत्राः ओंत्र्यं
बकंयजामहेसुगंधिंपुष्टिवर्द्धनम्॥उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥१॥ओं
रुद्रायस्वाहाइदंरुद्राय॥श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौ
व्यात्तम् इष्णन्निषाणामुम्मइषाणसर्वलोकम्मऽइषाण ॥ २ ॥ ओंश्रियैस्वाहाइदं०
यदक्रंदः प्रथमंजायमानऽउद्यंत्समुद्रादुतवापुरीषात् श्येनस्यपक्षाहरिणस्यबाहूउप
स्तुत्यंमहिजाततेअर्वन् ३ ओंस्कंदायस्वाहाइदं०इदंविष्णुर्विचक्रमेत्रेधानिदधेपद

मृ समूढमस्यपाᳪंसुरे ॥ ४ ॥ ओंविष्णवेस्वाहाइदं० ब्रह्मजज्ञानंप्रथमंपुरस्ताद्वि
सीमतः सुरुचोवेनऽआवः सबुध्न्याउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चविवः
॥ ५ ॥ ओंब्रह्मणेस्वाहाइदं त्रातारमिंद्रमवितारमिंद्रᳪंहवेहवेसुहवᳪंशूरमिंद्रम् ॥
ह्वयामिशक्रंपुरुहूतमिंद्रᳪंस्वस्तिनोमघवाधात्विंद्रः ॥ ६ ॥ ओंइंद्रायस्वाहाइदं०
यमायत्वामखायत्वासूर्यस्यत्वातपसेदेवस्त्वासवितामध्वानक्तुपृथिव्याः सᳪंस्पृ
शस्पाहिअर्चिरसिशोचिरसितपोसि ॥ ७ ॥ ओंयमायस्वाहाइदं० कार्षि
रसिसमुद्रस्यत्वाक्षित्याऽउन्नयामिसमापो अद्भिरग्मतसमोषधीभिरोषधीः ॥ ८ ॥
ओंकालायस्वाहाइदं० ओंचित्रावसोस्वस्तितेपारमसीय ॥९॥ ओंचित्रगुप्तायस्वाहा
इदं ॥ अथप्रत्यधिदेवानांमंत्राः सनःपितेवसूनवेग्नेसूपायनोभव ॥ सचस्वानः स्व

स्तये ॥ १ ॥ ओंअग्नयेस्वाहाइदं० आपोअद्यान्वचारिषर्ठ॑रसेनसमसृक्ष्महि ॥ पय
स्वानग्नआगमंतम्मासर्ठ॑सृजवर्चसाप्रजयाचधनेनच ॥ १ ॥ ओंअद्भ्यःस्वाहाइदं०
चिदसितयादेवतयांगिरस्वध्रुवासीद ॥ परिचिदसितयादेवतयांगिरस्वध्रुवासीद १॥
ओंपृथिव्यैस्वाहाइदं॥इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् समूढमस्यपार्ठ॑सुरे ॥१॥
ओंविष्णवेस्वाहाइदं०इंद्रऽआसान्नेताबृहस्पतिर्दक्षिणायज्ञः पुरऽएतुसोमःदेवसेना
नामभिभंजतीनांजयंतीनांमरुतोयंत्वग्रम् ॥ १ ॥ओंइंद्रायस्वाहाइदं०इंद्रदैवीर्विशो
मरुतोनुवर्त्मानोभवन्यथेंद्रंदैवीर्विशोमरुतोनुवर्त्मानोभवन् ॥एवमिमंयजमानंदैवी
श्चविशोमानुषीश्चानुवर्त्मानोभवंतु ॥ १ ॥ ओंइंद्राण्यैस्वाहाइदं० प्रजापतेनत्वदेता
न्यन्योविश्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयर्ठ॑स्यामपत

योरयीणाम् ॥ १ ॥ ओंप्रजापतयेस्वाहाइदं० नमोस्तुसर्पेभ्योयेकेचपृथिवीमनु ये ऽअंतरिक्षेयेदिवितेभ्यः सर्पेभ्योनमः ॥ १ ॥ ओंसर्पेभ्यः स्वाहाइदं० ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरुचोवेनआवः सबुध्न्याउपमाअस्यविष्ठाः सतश्चयोनिमसतश्चविवः ॥ १ ॥ ओंब्रह्मणेस्वाहाइदं ॥ अथगणपंचकमंत्राः ओंगणानांत्वा ॥ १ ॥ ओंगणपतयेस्वाहाइदं जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः ॥ सनःपरिषदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः ॥ १ ॥ ओंदुर्गायैस्वाहाइदं ॥ वायोयेतेसहस्रिणोरथाशस्तेभिरागहिनियुत्वांत्सोमपीतये ॥ १ ॥ ओंवायवेस्वाहाइदं घृतंघृतपावानः पिबतवसांवसापावानः पिबतांतरिक्षस्यहविरसिस्वाहा ॥ दिशःप्रदिशआदिशोविदिशउदिशोदिग्भ्यः स्वाहा ॥ १ ॥ ओंआरिक्षायस्वाहाइदं या

वांकशामधुमत्यश्विनासूनृतावतीतयायज्ञंमिमिक्षताम्‌पिप्टतान्नोभरीमभिः ॥ १ ॥
ओंअश्विभ्यांस्वाहाइदं अथनक्षत्राणांमंत्राः ॥ अश्विनातेजसाचक्षुः प्राणेनसर
स्वतीवीर्य्यम् वाचेंद्रोबलेनेंद्रायदधुरिंद्रियम् ॥ १ ॥ ओंदस्राभ्यस्वाहाइदं यमायत्वा
मखायत्वा सूर्यस्यत्वातपसेदेवस्त्वासवितामध्वानक्तुपृथिव्याः ॥ सꣳस्पृशस्पाहि
अर्चिरसिशोचिरसितपोसि ॥ १ ॥ ओंभरण्यैस्वाहा० अयमग्निः सहस्त्रिणोवा
जस्यशतिनिस्पतिः ॥ मूर्द्धाकवीरयीणाम् ॥ १ ॥ ओंकृत्तिकाभ्यःस्वाहाइदं० ब्रह्मज
ज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनऽआवः ॥ सबुध्न्याउपमाअस्यविष्ठाःसतश्च
योनिमसतश्चविवः ॥ १ ॥ ओंरोहिण्यैस्वाहाइदंरो० सोमोधेनुꣳसोमोअर्वंतमाशुꣳ
सोमोवीरंकर्मण्यंददाति सादन्यंविदथ्यꣳसभेयंपितृश्रवणंयोददाशदस्मै ॥ १ ॥ ओंमृ

गशिरसेस्वाहाइदं० ॐनमस्तेरुद्रमन्यवउतोतइषवेनमः बाहुभ्यामुततेनमः ॐआ र्द्रायैस्वाहा अदितिर्द्यौरदितिरंतरिक्षमदितिर्मातासपितासपुत्रः ॥ विश्वेदेवाअदि तिः पंचजनाअदितिर्जातमदितिर्जनित्वम् ॥ १ ॥ ॐआदितेयायस्वाहा इदं० वा चस्पतयेपवस्ववृष्णोअꣳशुभ्यांगभस्तिपूतः ॥ देवोदेवेभ्यःपवस्वयेषांभागोसि ॥ ॥ १ ॥ ॐपुष्यायस्वाहाइदं० ॐनमोस्तुसर्पेभ्योयेकेचपृथिवीमनुयेअंतरिक्षेयेदि वितेभ्यःसर्पेभ्योनमः ॥ १ ॥ ॐआश्लेषायैस्वाहा इदं० पितृभ्यःस्वधायिभ्यः स्व धानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः अक्षन्नपितरोमीमदंतापितरोतीतृपंतापितरःपितरःशुन्धध्वम् ॥ १ ॥ ॐमघा यैस्वाहाइदं० भगप्रणेतर्भगसत्यराधोभगेमांधियमुदवाददन्नः ॥ भगप्रणोजनयगो

भिरश्वैर्भगप्रनृभिर्नृवंतःस्याम ॥ १ ॥ ओंपूर्वाफाल्गुन्यैस्वाहा इदं० दैव्यावध्वर्यू
आगतर्ठ॑रथेनसूर्यत्वचामध्वायज्ञर्ठ॑समंजाथे ॥ तम्प्रक्त्नथायंवेनश्चित्रन्देवानाम्
॥ १॥ ओंउत्तराफाल्गुन्यैस्वाहाइदं० विभ्राड्बृहत्पिबतुसोम्यंमध्वायुर्दधद्यज्ञपताव
विन्हुतम्वातजूतोयोअभिरक्षतित्मनाप्रजाःपुपोषपुरुधाविराजति॥१॥ हस्तायस्वा
हाइदं० त्वष्टातुरीयोअद्भुतइंद्राग्नीपुष्टिवर्धनाद्विपदाछंदऽइंद्रियमुक्षागौर्न्नवयोदधुः
ओंत्वष्ट्रेस्वाहा इदं०पीवोअन्नांरयिवृधः सुमेधः श्वेतः सिषक्तिनियुतामभिश्रीःतेवा
यवेसुमनसोवितस्थुर्विश्वेन्नरःस्वपत्यानिचक्रुः॥१॥ओंवायव्यायस्वाहाइदं० इंद्राग्नी
आगतर्ठ॑सुतंगीभिर्न्नभोवरेण्यम्॥अस्यपातंधियेषिता॥१॥ओंविशाखायैस्वाहाइदं०
नमोमित्रस्यवरुणस्यचक्षसेमहोदेवायतदृतर्ठ॑सपर्यत ॥ दूरेदृशेदेवजातायकेत

वेदिवस्पुत्रायसूर्यायशर्ठंसत ॥ १॥ ओंअनुराधायैस्वाहाइदं०सइषुहस्तैःसनिषंगि भिर्वशीसर्ठंस्स्रष्टासयुधइंद्रोगणेनसर्ठंसृष्टजित्सोमपाबाहुशर्द्ध्यूग्रधन्वाप्रतिहिता भिरस्ता।१।ओंज्येष्ठायैस्वाहाइदं० मातेवपुत्रंपृथिवीपुरीष्यमग्निर्ठंस्वेयोनावभारुषा तांविश्वैर्देवैर्ऋतुभिःसम्विदानःप्रजापतिर्विश्वकर्माविमुंचतु ॥ ओंमूलायस्वाहाइदं० अपाघमपकिल्बिषमपकृत्यामपोरपः॥ अपामार्गत्वमस्मदपदुःष्वप्न्यर्ठंसुव॥ओंपू र्वाषाढायैस्वाहाइदं०विश्वेऽअद्यमरुतोविश्वऽऊतीविश्वेभवंत्वग्नयः समिद्धाः विश्वे नोदेवाअवसागमंतुविश्वमस्तुद्रविणंवाजोऽअस्मे ॥ १ ॥ ओंउत्तराषाढायैस्वाहा इदं० तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात् ॥ १ ॥ ओंअभि जितेस्वहाइदं० इदंविष्णु० ॥ १ ॥ ओंश्रवणायस्वाहाइदं०वसोःपवित्रमसिशत

धारंवसोः पवित्रमसिसहस्रधारम् देवस्त्वासवितापुनातुवसोः पवित्रेणशतधा
रेणसुप्वाकामधुक्षः ओंधनिष्ठायैस्वाहाइदं० वरुणस्योत्तंभनमसि० ॥ १ ॥ ओंश
तभिषायैस्वाहाइदं०उतनोहिर्बुध्न्यः शृणोत्वजएकपात्पृथिवीसमुद्रः विश्वेदेवाऋ
तावृधोहुवानास्तुतामंत्राः कविशस्ताऽअवंतु ॥ १ ॥ ओंपूर्वाभाद्रपदायैस्वाहाइदं०
शिवोनामासिस्वधितिस्तेपितानमस्तेअस्तुमामाहिंसीः निवर्तयाम्यायुषेन्नाद्या
यप्रजननायरायस्पोषायसुप्रजास्त्वायसुवीर्य्याय ॥ १ ॥ ओंउत्तराभाद्रपदायैस्वाहा
इदं०पूषन्तवव्रतेवयन्नरिष्येमकदाचनस्तोतारस्तइहस्मसि ॥ १ ॥ ओं रैवत्यैस्वा
हाइदं० अथयोगानांमंत्रः योगेयोगेतवस्तरंवाजेवाजेहवामहेसखायइंद्रमूतये॥१॥
योगेभ्यःस्वाहाइदं०अथकरणानांमंत्रः॥भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभि

र्यजत्राः स्थिरैरंगैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितंयदायुः ओंरकणेभ्यःस्वाहा
इदं० ध्रुवासिध्रुवोयंयजमानोस्मिन्नायतनेप्रजयापशुभिर्भूयात् ॥ घृतेनद्यावाप्टथि
वीपूर्यैथामिंद्रस्यछदिरसिविश्वजनस्यछाया ॥ १ ॥ ओंध्रुवायस्वाहाइदं०पंचनद्यः
सरस्वतीमपियंतिसस्रोत्तसः ॥ सरस्वतीतुपंचधासोदेशेभवत्सरित् ॥ १ ॥ ओंनदी
भ्यः स्वाहाइदं०सप्तऋषयः प्रतिहिताः शरीरेसप्तरक्षंतिसदमप्रमादम् ॥ सप्ताय:
स्वपतोलोकमीयुस्तत्रजाग्रतोअस्वप्नजौसत्रसदौचदेवौ ॥ १ ॥ ओंसप्तऋषिभ्यः
स्वाहाइदं० इमंमेवरुणश्रुधीहवमद्याचमृडयत्वामवस्युराचके ॥ १ ॥ ओंसप्तसागरे
भ्यःस्वाहाइदं०प्रपर्वतस्यवृषभस्यपृष्ठान्नावश्चरंतिस्वसिचइऽयानाःताऽआववृत्रन्न
धरागुदक्ताअहिर्बुध्न्यमनुरीयमाणाः ॥ विष्णोर्विक्रमणमसिविष्णोर्विक्रांतमसिवि

ष्णोः क्रांतमसि ॥ १ ॥ ओंपर्वतेभ्यः स्वाहाइदं० जवोवस्तेव्वाजिन्निहितोगुहायः
श्येनेपरीतोऽअचरच्चव्वाते तेननोव्वाजिन्बलव्वान्बलेनव्वाजजिच्चभवशमनेचपारयि
ष्णुः ॥ १ ॥ ओंरैवंतायस्वाहाइदं० सुपर्णोसिगरुत्मांस्त्रिवृत्तेशिरोगायत्रंचक्षुर्बृहद्र
थंतरेपक्षौस्तोमआत्माछंदांᳬस्यंगानियजूᳬंषिनाम सामतेतनूर्वामदेव्यंयज्ञाय
ज्ञियंपुच्छंधिष्ण्याःशफाःसुपर्णोसिगरुत्मांदिवंगच्छस्वःपतः ॥ १ ॥ ओंगरुडाय
स्वाहाइदं० असंख्यातासहस्राणियेरुद्राऽअधिभूम्याम् ॥ तेषाᳬंसहस्रयोजनेवध
न्वानितन्मसि ॥ १ ॥ ओंरुद्रायस्वाहाइदं० ओंसहस्रशीर्षापुरुष० ॥ १ ॥ ओंविष्ण
वेस्वाहाइदं० ओंवास्तोष्पतेप्रतिजानीह्यस्मान्स्वावेशोअनमीवोभवानः ॥ यत्त्वेम
हेप्रतितन्नोजुषस्वशन्नोअस्तुद्विपदेशंचतुष्पदे ॥ १ ॥ अमीवहाव्वास्तोष्पतेविश्वारू

ग्रं०शां० पाण्याविशन् सखासुशेवऽएधिनः ॥ २ ॥ ओंवास्तवस्वाहाइदं० गणानांत्वा ओंग पद्ध०
॥५६॥ णपतयेस्वाहाइदं० नमोस्तुसर्पेभ्योयेकेचपृथिवीमनुयेअंतरिक्षेयेदिवितेभ्यः सर्पे
भ्योनमः ॥ १ ॥ ओंक्षेत्रपालायस्वाहाइदं० जातवेदसेसुनवामसोममरातीयतोनि
दहातिवेदः ॥ सनः पर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः ॥ १ ॥ ओंचा
मुंडायैस्वाहाइदं० योवःशिवतमोरसस्तस्यभाजयतेहनः उशतीरिवमातरः ओं
गौर्यादिमातृभ्यः स्वाहाइदं० ओंअग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं होतारंरत्न
धातमम् ॥१॥ ऋग्वेदायस्वाहाइदं०इषेत्वोर्जेत्वावायवस्थदेवोवः सविताप्रार्पयतुश्रे
ष्ठतमायकर्मणऽआप्यायध्वमघ्न्याऽइंद्रायभागंप्रजावतीरनमीवाअयक्ष्मा मावस्ते ॥५७॥
नईशतमाघशर्ठसोध्रुवाअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि १ ओंयजु

वेंदायस्वाहाइदं० अग्नआयाहिवीतयेगृणानोहव्यदातयेनिहोतासत्सिबर्हिषि ॥१॥
ओंसामवेदायस्वाहाइदं० शन्नोदेवीरभिष्टयऽआपोभवंतुपीतयेशंय्योरभिस्रवंतुनः
॥ १ ॥ ओंअथर्ववेदायस्वाहाइदं०त्रातारमिंद्रमवितारमिंद्रर्ठ॰हवेहवेसुहवर्ठ॰शूरमिं
द्रम् ॥ व्हयामिशक्रंपुरुहूतमिंद्रर्ठ॰स्वस्तिनोमघवाधात्विंद्रः ॥ १ ॥ ओंइंद्रायस्वाहा
इदं०त्वन्नोअग्नेतवदेवपायुभिर्मघोनोरक्षतन्वश्चवंद्यत्रातातोकस्यतनयेगवामस्यनि
मेषर्ठ॰रक्षमाणास्तवव्रते ॥ १ ॥ ओंअग्नयेस्वाहाइदं०सुगनुपंथांप्रदिशन्नऽएहिज्यो
तिष्मध्येह्यजरन्नआयुः अपैतुमृत्युरमृतंमऽआगाद्वैवस्वतोनोअभयंकृणोतुस्वाहा
ओंयमायस्वाहाइदं०असुन्वंतमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य ॥ अ
न्यमस्मदिच्छसातइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ १ ॥ ओंनैर्ऋत्यायस्वाहा० तत्वा

यामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरु शर्ठ॑समानआयुः प्रमोषीः ॥ १ ॥ ओंवरुणायस्वाहाइदं० आनोनियुद्भिः शतिनीभिरध्वरर्ठ॑सहस्रिणीभिरुपयाहियज्ञम् ॥ वायोऽअस्मिन्त्सवनेमादयस्वयूयंपातस्वस्तिभिःसंदानः ॥ १ ॥ ओंवायवेस्वाहाइदं० वयर्ठ॑सोमव्रतेतवमनस्तनूषुबिभ्रतः प्रजावंतः सचेमहिओंधनदायस्वाहाइदं० तमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयम् ॥ पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये ॥ १ ॥ ओंईशानायस्वाहाइदं० अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः यःशर्ठ॑सतेस्तुवतेधायिपज्रइंद्रज्येष्ठाऽअस्माँ॑ २ अवंतुदेवाः ॥ १ ॥ ओंअंतरिक्षायस्वाहाइदं० स्योनापृथिवीनोभवान्नृक्षरानिवेशनीयच्छानः शर्मसप्रथाः ॥ १ ॥ ओं

धरायैस्वाहाइदं० ओंचतुःषष्टियोगिनीभ्यः स्वाहाइदं० अथवाप्रणवादिनमोंतचतु
र्थ्यंतनामभिर्वाहोमः ओंभूतायित्वानारातयेस्वरभिविख्येस्वंद्दर्ठंहंतांदुर्याः ॥ पृथि
व्यामुर्वंतरिक्षमन्वेमिपृथिव्यास्त्वानाभौसादयाम्यादित्याउपस्थेग्रेहव्यर्ठंरक्ष ॥१॥
ओंपंचभूतेभ्यः स्वाहा इदं० विश्वकर्मन्हविषावर्द्धनेनत्रातारमिंद्रमकृणोरवध्यम् ॥
तस्मैविशःसमनमंतपूर्वीहयमुग्रोविहव्योयथासत ॥ १ ॥ ओंविश्वकर्मणेस्वाहा इ
दं० ततोयथासंख्यंप्रधानमंत्रेणजुहुयात् ॥ ततोलक्ष्मीहोमः तंडुलाज्यशर्करापंचा
मृतद्रव्येणओंश्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमाश्विनौव्यात्तम् ॥
इष्णन्निषाणामुम्मइषाणसर्वंलोकम्मइषाण मनसःकाममाकूतिंवाचःसत्यमशीम
हि ॥ पशूनार्ठंरूपमन्नस्यमयिश्रीःश्रियतांयशःस्वाहा ॥ १ ॥ श्रीसूक्तेनचरुहोमः

ओंहिरण्यवर्णांहरिणींसुवर्णरजतस्रजां॥ चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावहस्वा
हा ॥ १ ॥ तांमआवहजातवेदोलक्ष्मीमनपगामिनीं ॥ यस्यांहिरण्यंविंदेयंगामश्वं
पुरुषानहं ॥२॥ अश्वपूर्वांरथमध्यांहस्तिनादप्रबोधिनीं ॥ श्रियंदेवीमुपह्वयेश्रीर्मा
देवीर्जुषतां ॥ ३ ॥ कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्पयंतीं ॥ पद्मेस्थि
तांपद्मवर्णांतामिहोपह्वयेश्रियं ॥ ४ ॥ चंद्रांप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजु
ष्टामुदारां ॥ तांपद्मनेमिंशरणमहंप्रपद्येअलक्ष्मीर्मेनश्यतांत्वांवृणोमि ॥ ५ ॥ आ
दित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः ॥ तस्यफलानितपसानुदंतुमा
यान्तरायाश्चबाह्याअलक्ष्मीः ॥ ६ ॥ उपैतुमांदेवसखःकीर्तिश्चमणिनासह ॥
प्रादुर्भूतोसुराष्ट्रेस्मिन्कीर्तिंवृद्धिंददातुमे ॥ ७ ॥ क्षुत्पिपासामलांज्येष्ठामलक्ष्मीर्नां

शयाम्यहं ॥ अभूतिमसमृद्धिंचसर्वांनिर्णुदमेगृहात् ॥ ८ ॥ गंधद्वारांदुराधर्षांनित्य
पुष्टांकरीषिणीं ॥ ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं ॥९॥ मनशःकाममाकूतिंवा
चःसत्यमशीमहि ॥ पशूनांरूपमन्नस्यमयिश्रीःश्रयतांयशः ॥ १० ॥ कर्दमेनप्र
जाभूतामयिसंभवकर्दमः ॥ श्रियंवासयमेकुलेमातरंपद्ममालिनीं ॥ ११ ॥ आपः
स्रजंतुस्निग्धानिचिक्लीतवसमेगृहे ॥ नीचदेवींमातरंश्रियंवासयमेकुले ॥ १२ ॥ आ
र्द्रांपुष्करिणींयष्टिंसुवर्णांहेममालिनीं॥सूर्यांहिरण्मयींलक्ष्मींजातवेदोममावह ॥१३॥
आर्द्रांयःकरिणींयष्टिंपिंगलांपद्ममालिनीं ॥ चंद्रांहिरण्मयींलक्ष्मींजातवेदोममाव
ह ॥ १४ ॥ तांमआवहजातवेदोलक्ष्मीमनपगामिनीं ॥ यस्यांहिरण्यंप्रभूतंगावो
दास्योश्वान्विंदेयंपुरुषानहं ॥ १५ ॥ ततःसर्वेभ्योहविर्भ्यःस्विष्टकृद्धोमः ओंअ

ग्नयेस्विष्टकृतेस्वाहा ॥ इदमग्नयेस्विष्टकृतेनमम ॥ ततोनवाज्याहुतयः ओंभूःस्वाहा इदमग्नये ॥ १ ॥ ओंभुवःस्वाहाः इदंवायवे ॥ २ ॥ ओंस्वःस्वाहा इदंसूर्याय ॥ ३ ॥ ओंत्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषाᳬसिप्रमुमुग्ध्यस्मत्स्वाहा ॥ ४ ॥ इदमग्निवरुणाभ्यां ओंसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ ॥ अवयक्ष्वनोवरुणᳬंररराणोवीहिमृडीकᳬंसुहवोनऽएधिस्वाहा ॥ ५ ॥ इदमग्निवरुणाभ्यां ओंअयाश्चाग्नेस्यनभिशस्तीपाश्चसत्यमित्वमयाऽअसि ॥ अयानोयज्ञंवहास्ययानोधेहिभेषजᳬंस्वाहा ॥ ६ ॥ इदमग्निभेषजाय ओंयेतेशतंवरुणंयेसहस्त्रंयज्ञियाःपाशावितताम हांतः ॥ तेभिर्न्नोऽअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतः स्वर्काःस्वाहा ॥ ७ ॥ इदं

वरुणायसवित्रेविष्णवेविश्वेभ्योमरुद्भ्यः स्वर्केभ्यः ॥ ओंउदुत्तमंवरुणपाश
मस्मदवाधमंविमध्यमꣳश्रथाय ॥ अथावयमादित्यव्रतेतवानागसोऽअदितयेस्या
मस्वाहा ॥ ८ ॥ इदंवरुणाय ओंप्रजापतयेस्वाहा इदंप्रजापतये ॥ ९ ॥ होमां
तेग्रहपूजनंकर्त्तव्यंततोदिक्पालपूजनंबलिदानंमाषभक्तदधिशष्कुलीदीपसहितेन
बलिनापूजयेत् ॥ अथबलिदानमंत्राः अहोइंद्रगजेंद्रस्थवज्रहस्तप्रपूजितः ॥ त्रा
तारमिंद्रमंत्रेणप्राचींरक्षतुदिक्पते ॥ १ ॥ ओंत्रातारमिंद्रमवितारमिंद्रꣳहवेहवेसु
हवꣳशूरमिंद्रम् ॥ व्हयामिशक्रंपुरुहूतमिंद्रꣳस्वस्तिनोमघवाधात्विंद्रः ॥ २ ॥ पूर्वे
इंद्रायनमः इंद्रस्यानुचरेभ्योनमः भोइंद्रदिशंरक्षबलिंभक्षयजमानस्याभ्युदयंकुरुय
जमानस्यायुःकर्त्ताशांतिकर्त्तापुष्टिकर्त्तातुष्टिकर्त्तावरदोभव ॥ १ ॥ अहोसप्तार्चिमे

षस्थहव्यवाहनपूजितः ॥ त्वन्नोःअग्नेतिमंत्रेणरक्षाग्नेयांदिशांपते ॥ १ ॥ ओंत्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः ॥ यजिष्ठोवन्हितमःशोशुचानोविश्वाद्वेषाᳪंसिप्रमुमुग्ध्यस्मत् ॥२॥ आग्नेयामग्नयेनमः अग्नेरनुचरेभ्योनमः दिशं॰ ॥२॥ अहोमहिषमारूढदंडपाणेवरप्रदः ॥ पूज्यःसुगन्नुपंथेतिदक्षिणादिक्प्रपालकः ओंसुगन्नुपंथांप्रदिशन्नएहिज्योतिष्मद्धेह्यजरन्नआयुः ॥ अपैतुमृत्युरमृतंमआगाद्वैवस्वतोनोअभयंकृणोतुस्वाहा ॥ १ ॥ दक्षिणेयमायनमः यमस्यानुचरेभ्योनमः दिशं॰अहोनैर्ऋतिदिक्पालनैर्ऋत्यांखड्गधारकः॥आगच्छकौशिकारूढअसुन्वन्तेतिपूजितः ॥१॥ ओंअसुन्वंतमयजमानमिच्छस्तेनस्येत्यामान्विहितस्करस्य ॥ अन्यमस्मदिच्छसातइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ २ ॥ नैर्ऋत्यांनिर्ऋतयेनमः निर्ऋ

तेरनुचरेभ्योनमःदिशं० ॥ ४ ॥ ओंहोवरुणदिक्पालवारुण्यांमकरेस्थितः ॥ अर्चि
तःपाशहस्तश्चतत्वायामीतिमंत्रतः ॥ १ ॥ ओंतत्वायामिब्रह्मणावंदमानस्तदाशा
स्तेयजमानोहविर्भिः ॥ ओंहेडमानोवरुणेहबोद्ध्युरुशꣳसमानआयुःप्रमोषीः ॥२॥
पश्चिमेवरुणायनमः वरुणस्यानुचरेभ्योनमः दिशंरक्ष० ॥५॥ अहोवायव्यदिक्पा
लमृगपृष्ठिंसमाश्रितः ॥ ओंआनोनियुद्भिर्मंत्रेणवायव्यांरक्षपूजितः॥आनोनियुद्भिःश
तिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञम् ॥ वायोअस्मिन्त्सवनेमादयस्वयूयंपा
तस्वस्तिभिःसदानः ॥२॥ वायव्यांवायवेनमः वायोरनुचरेभ्योनमःदिशं० ॥६॥ अ
होनरविमानस्थगदापाणेवरप्रद ॥ उत्तरांहिदिशंरक्षवयंसोमेतिपूजितः ॥१॥ ओंव्र
यꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजावंतःसचेमहि ॥ २ ॥ उत्तरेकुबेरायनमः

कुबेरस्यारनुचरेभ्योनमः दिशं० अहोवृषभमारूढशूलपाणेवरप्रद ॥ रुद्राशांपूजितो रक्षतमीशानेतिमंत्रतः॥१॥ ओंतमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहे वयम् ॥ पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये ॥ २ ॥ ईशान्यामीशानायनमः ईशानस्यानुचरेभ्योनमः दिशं० ॥ ८ ॥ अहोहंसस्थितोब्रह्मन्व्योमरक्षतुदिक्पते ॥ कमंडलुधरः साक्षीअस्मेरुद्रेतिपूजितः ॥ १ ॥ ओंअस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः ॥ यःशंसतेस्तुवतेधायिपज्रइंद्रज्येष्ठाअस्माँअवंतुदेवाः॥ २ ॥ ओंऊर्ध्वंब्रह्मणेनमः ब्रह्मणोनुचरेभ्योनमः दिशं० ॥ ९ ॥ अहोगरुडमारुढशंखचक्रगदाधर॥पालयाधोदिशंविष्णोस्योनापृथ्वीतिमंत्रतः॥१॥ ओंस्योनापृथिविनोभवानृक्षरानिवेशनीयच्छानःशर्मसप्रथाः ॥ २ ॥ अधःअनंतायनमः

अनंतस्यानुचरेभ्योनमः दिशं० ॥ १० ॥ ततस्तैलपूरितचतुर्वर्तिप्रज्वालितदीपक
सहितांमाषभक्तदधिशष्कुलावलिंशूर्पेपात्रेकृत्वानैर्ऋतिंदिशंगत्वा ॥ ओंहिंकाराय
स्वाहा हिंकृतायस्वाहा क्रंदतेस्वाहा वक्रंदायस्वाहा प्रोथतेस्वाहा प्रप्रोथायस्वाहा
गंधायस्वाहा घ्रातायस्वाहा निविष्टायस्वाहोपविष्टायस्वाहा संदितायस्वाहा बलाते
स्वाहाऽऽसीनायस्वाहा शयानायस्वाहा स्वपतेस्वाहा स्वपतेस्वाहा जाग्रतेस्वाहा कू
जतेस्वाहाप्रबुद्धायस्वाहा विजृंभमाणायस्वाहा विवृत्तायस्वाहा सर्ठंहानायस्वाहोप
स्थितायस्वाहाऽयनायस्वाहा प्राणायस्वाहा१यत्तेस्वाहा धावतेस्वाहोद्द्रावायस्वाहो
दुतायस्वाहा शूकारायस्वाहा शूकृतायस्वाहा निषस्मायस्वाहोस्थिनायस्वाहा जवा
यस्वाहा बलायस्वाहा विवर्त्तमानायस्वाहा विवृत्तायस्वाहा विधून्वानायस्वाहा विधू

तायस्वाहा शुश्रूषमाणायस्वाहा श्रृण्वतेस्वाहेक्षमाणायस्वाहेक्षितायस्वाहा वीक्षितायस्वाहा निमेषायस्वाहा पदत्तितस्मैस्वाहा यत्पिबतितस्मैस्वाहा यन्मूत्रंकरोति तस्मैस्वाहा कुर्वतेस्वाहा कृतायस्वाहा ॥ २ ॥ कौलीरेचित्रकूटेहिमगिरिशिखरेकांत जालंधरेवासौराष्ट्रेसिंधुदेशेमगधपुरवरेकौशलेवाकलिंगे ॥ कर्णाटेकौंकणेवाभृगुषुपुरवरेकान्यकुब्जेस्थितावातेसर्वेयज्ञरक्षाकरणकृतधियःपांतुवःक्षेत्रपालाः॥१॥द्वाभ्यां मंत्राभ्यांक्षेत्राधीशायनमः क्षेत्राधीशस्यानुचरेभ्योनमः दिश०स्वपादौप्रक्षाल्याच म्यद्यौः शांतिरंतरिक्षꣳशांतिः पृथिवीशांतिरापः शांतिरोषधयः शांतिःवनस्पतयः शांतिर्विश्वेदवाः शांतिर्ब्रह्मशांतिः सर्वꣳशांतिःशांतिरेवशांतिःसामाशांतिरेधि द्विपदचतुष्पदेभ्यः शांतिरस्तु ॥ १ ॥ इतिशांतिंकुर्यात् ॥ ततःपूर्णाहुतिंजुहुयात् ॥

आज्यस्थाल्यामाज्यनिर्वापः आज्याधिश्रयणंस्त्रुकस्त्रुवौप्रतप्यसंमृज्यअभ्युक्ष्यपुनः
प्रतप्यनिदध्यात् ततः आज्यमुद्वास्यउत्पूयअवेक्ष्यअपद्रव्यनिरसनंशुचिरादायच
तुर्गृहीतमाज्यंकृत्वा स्त्रुवैश्चतुर्भिर्गृहीतंपूरयित्वानालिकेरंचघृतेनपूरयित्वाकुंकुमेनपू
जयित्वाकौसुंभवस्त्रेणवेष्टयित्वा सूत्रेणचवेष्टयित्वास्त्रुचौधृत्वा तस्योपरिपूगीफलंचधृ
त्वा नालिकेरस्यमुखमात्मनः सन्मुखंकृत्वाविवाहे अग्निसन्मुखंकृत्वाजुहुयात् पूर्णा
हुत्यांमृडनाम्नेवैश्वानरायइदंगंधंपुष्पंधूपंदीपंनैवेद्यं आचमनं एकोनपंचाशन्मरु
द्गणेभ्योनमः गंधंपुष्पंधूपंदीपंनैवेद्यंआचमनं ततस्तांस्त्रुचिंगृहीत्वोत्त्थायघृतेना
विच्छिन्नधारयाग्नौपातयेत् मूर्द्धानमितिभारद्वाजऋषिः वैश्वानरोदेवतात्रिष्टुप्छंदः
पूर्णाहुतिहोमेविनियोगः ओंमूर्द्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निं ॥

कविर्ठंसंम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः ॥ १ ॥ पूर्णादर्व्विपरापत सुपूर्णापुनरापत ॥ वस्नेवव्विक्रीणावहाइषमूर्जर्ठंशतक्रतो ॥ २ ॥ चित्तिंजुहोमिमन साघृतेनयथादेवाइहागमन्वीतिहोत्राऋतावृधः ॥ पत्येव्विश्वस्यभूमनोजुहोमिव्विश्व कर्मणेव्विश्वाहादाभ्यर्ठंहविः ॥ ३ ॥ सप्ततेअग्नेसमिधःसप्तजिव्हाः सप्तऋषयः स प्तधामप्रियाणि ॥ सप्तहोत्राः सप्तधात्वायजंतिसप्तयोनीरापृणस्वघृतेनस्वाहा ॥ ४ ॥ शुक्रज्योतिश्चचित्रज्योतिश्चसत्यज्योतिश्चज्योतिष्मांश्चशुक्रश्चऋतपाश्चात्यर्ठंहाः ॥५॥ ईदृङ्चान्यादृङ्चसदृङ्चप्रतिसदृङ्चमितश्चसम्मितश्चसभराः ॥६॥ ऋतश्चस त्यश्चध्रुवश्चधरुणश्चधर्त्ताचव्विधर्त्ताचव्विधारयः ॥७॥ ऋतजिच्चसत्यजिच्चसेनजिच्चसु षेणश्चअंतिमित्रश्चदूरेअमित्रश्चगणः॥८॥ ईदृक्षासऽएतादृक्षासऽऊषुणः सदृक्षासः

प्रतिसदृक्षासऽएतन मितासश्चसम्मितासोनोऽअद्यसभरसोमरुतोयज्ञेऽअस्मिन्
॥९॥स्वतवांश्चप्रघासीचसांतपनश्चगृहमेधीच॥क्रीडीचसाकीचोज्जेषी॥१०॥उग्रश्च
भीमश्चध्वांतश्चधुनिश्च॥सासह्वांश्चाभियुग्वाचव्विक्षिपःस्वाहा॥११॥पुनस्त्वादित्या
रुद्रावसवःसमिंधतांपुनर्ब्रह्माणोव्वसुनीथयज्ञैः ॥ घृतेनत्वंतन्वंव्वर्द्धयस्वसत्याःसंतुय
जमानस्यकामाः॥१२॥इतिपठित्वायजमानस्यकामाःसत्याःसंतु इतिश्रीफलंयज
मनाभिमुखंजुहुयात् घृतंचरुद्रकलशेत्यागःइदमिंद्रायनमम पूर्णाहुतिंहुत्वोपविश्य
स्रुवेणभस्मानीयदक्षिणकरानामिकयागृहीतभस्मनात्र्यायुषंकुर्यात् ओंत्र्यायुषंज
मदग्नेरितिललाटे ओंकश्यपस्यत्र्यायुषमितिग्रीवायां ओंयद्देवेषुत्र्यायुषमितिदक्षि
णबाहुमूले ओंतन्नोऽअस्तुत्र्यायुषमितिहृदि एवंत्र्यायुषंकुर्यात्परकर्तृकेतत्तेइतिवि

शेषः ततोऽभ्युपस्थानं ओंइंद्रंदैवीर्विशोमरुतोनुवर्त्मानोभवन्यथेंद्रंदैवीर्विशोमरुता नुवर्त्मानोभवन् ॥ एवमिमंयजमानंदैवीश्चविशोमानुषीश्चानुवर्त्मानोभवंतु ॥ १ ॥ इमऽंस्तनमूर्जस्वंतंधयापांप्रपीनमग्नेशरिरस्यमध्ये ॥ उत्संजुषस्वमधुमंतमर्वंत्स मुद्रियर्ठंसदनमाविशस्व ॥ २ ॥ घृतंमिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतंवस्यधा म ॥ अनुष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यम् ॥ ३ ॥ समुद्रादूर्म्मिर्म्म धुमांउदारदुपाऽंशुनासमम्मृतत्वमानट् ॥ घृतस्यनामगुह्यंयदस्तिजिव्हादेवानाम मृतस्यनाभिः ॥ ४ ॥ वयन्नामप्रब्रवामाघृतस्यास्मिन्यज्ञेधारयामानमोभिः ॥ उप ब्रह्माश्रृणवच्छस्यमानंचतुःश्रृंगोवमीद्गौरएतत् ॥ ५ ॥ चत्वारिश्रृंगात्रयोऽस्यपादा द्वेशीर्षेसप्तहस्तासोअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यार ँऽआविवेश

॥ ६ ॥ त्रिधाहितंपणिभिर्गुह्यमानङ्गविदेवासोघृतमन्वविंदन् ॥ इंद्रऽएकर्ठंसूर्य्यंएक
यज्जजानव्वेनादेकर्ठंस्वधयानिष्टतक्षुः ॥ ७ ॥ एताअर्षंतिहृद्यात्समुद्राच्छतव्रजारि
पुणानावचक्षे ॥ घृतस्यधाराअभिचाकशीमिहिरण्ययोव्वेतसोमध्यआसाम् ॥ ८ ॥
सम्यक्स्रवंतिसरितोनधेनाऽअंतर्हृदामनसापूयमानाः ॥ एतेअर्षंत्यूर्मयोघृतस्यमृ
गाइवक्षिपणोरीषमाणाः ॥ ९ ॥ सिंधोरिवप्राध्वनेशूघनासोव्वातप्रमियःपतयंति
यिव्हाः ॥ घृतस्यधाराअरुषोनव्वाजीकाष्ठाभिंदन्नूर्मिभिःपिन्वमानः ॥ १० ॥ अ
भिप्रवन्तसमनेवयोषाःकल्याण्यःस्मयमानासोअग्निम् ॥घृतस्यधाराःसमिधोनसंत
ताजुषाणोहर्य्यतिजातवेदाः ॥ ११ ॥ कन्याइवव्वहतुमेतवाउऽअंज्यंजनाअभिचा
कशीमि ॥ यत्रसोमःसूयतेयत्रयज्ञोघृतस्यधाराअभितत्पवंते ॥ १२ ॥ अभ्यर्षतसु

ष्टुतिंगव्यमाजिमस्मासुभद्राद्रविणानिधत्त॥इमंयज्ञन्नयतदेवतानोघृतस्यधारामधु मत्पवंते ॥ १३ ॥ धामंतेविश्वंभुवनमधिश्रितमंतः समुद्रेहृद्यंतरायुषि ॥ अपामनी केसमिथेयआभृतस्तमश्यामधुमंतंतऽऊर्मिम् ॥ १४ ॥ चतुर्भिश्चचतुर्भिश्चद्वाभ्यां पंचभिरेवच॥हूयतेचपुनर्द्वाभ्यांतस्मैयज्ञात्मनेनमः ॥ १५ ॥ ज्ञानतोज्ञानतोवापि मंत्रकर्मक्रियाविधिः॥संपूर्णंकुरुयज्ञेशगार्हपत्यनमोस्तुते॥१६॥यथाशस्त्रप्रहाराणां कवचंभवतिवारणं ॥ तद्वद्देवापघातानांशांतिर्भवतिवारणम् ॥ १७ ॥ स्वस्तिश्रद्धांय शःप्रज्ञांविद्यांबुद्धिंश्रियंबलं ॥ आयुष्यंचैत्वमारोग्यंदेहिमेवांछितंफलं ॥ १८ ॥ य स्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु ॥ न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतं॥ ॥१९॥ कायेनवाचामनसेंद्रियैर्वाबुद्ध्यात्मनावानुसृतस्वभावात् ॥करोमियद्यत्सकलं

परस्मैनारायणायेतिसमर्पयामि ॥ २० ॥ प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् ॥
स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिः ॥ २१ ॥ ओंयज्ञपुरुषायनमः॥ततोहोम
संकल्पः ॥ ओंतत्सदद्यमासेपक्षेतिथौअमुकगोत्रेणामुकशर्मणामयाआघारादिपू
र्णाहुतिपर्यंतंयद्यद्द्रव्यंयावद्यत्संख्याकेनयेनयेनमंत्रेणययाकामनयायस्यैयस्यैदेव
तायैहुतंसासादेवताप्रीयतां॥तेदेवाः शांतिदापुष्टिदातुष्टिदावरदाभवंतु ग्रहजापके
भ्योग्रहतुष्ट्यैदानानिदेयानिततः संस्रवप्राशनं आचमनं॥ ओंतत्सदद्यास्मिन्ग्रह
मखहवनकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थंन्यूनातिरिक्तदोषपरिहारार्थंच
इदंपूर्णपात्रंसहिरण्यंप्रजापतिदैवतंअमुकगोत्रायामुकशर्मणेब्राह्मणायब्रह्मणेतुभ्य
महंसंप्रददे ॥ ओंस्वस्तीतिप्रतिवचनं ततोब्रह्मग्रंथिविमोकः ततःओंसुमित्रियान

आपऒऔषधयःसंतु इतिपवित्राभ्यांप्रणीताजलमानीयतेनशिरःसम्मृज्य ओंदुर्म्मि त्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयन्द्विष्मः इत्यैशान्यांप्रणीतान्युब्जीकरणंपवित्रे अग्नौप्रक्षिपेत् ततःस्तरणक्रमेणबर्हिरुत्थाप्याज्येनाभिघार्य ओंदेवागातुविदोगा तुवित्वागातुमित ॥ मनसस्यतइमंदेवयज्ञꣳस्वाहावातेधास्वाहा ॥ १ ॥ इतिमंत्रे णबर्हिर्होमः ततोनमोब्रह्मणेनमोस्त्वग्नयेपृथिव्यैऒषधीभ्योनमःवाजेनमःवाचस्प तयेनमः विष्णवेमहतेनमस्करोमि ॥ इतिमंत्रेणाग्निंत्रिःपर्युक्ष्यतज्जलेननेत्रस्पर्शनं ततःशुक्लांबरधरःशुक्लमाल्यानुलेपनोयजमानः आचार्यादीन्गंधमाल्यादिभिरभ्य र्च्याचार्यायब्रह्मणेऋत्विग्भ्यश्चवित्तानुसारेणदक्षिणांदद्यात् तत्रप्रयोगः ॥ ओंतत्स दद्यमासेपक्षेतिथौवासरेअमुकगोत्रोमुकशर्मावर्मागुप्तोवाहं अस्यनवग्रहमखकर्म

णः सांगतासिद्ध्यर्थं अमुकगोत्रायामुकप्रवरायामुकवेदस्यामुकशाखाध्यायिनेऽमुकशर्मणे ब्राह्मणायाचार्याय इमां दक्षिणां तुभ्यमहं संप्रददे इत्येवं ब्रह्मणे ऋत्विग्भ्यश्च दक्षिणां दद्यात् न्यूनातिरिक्तदोषपरिहारार्थं नवग्रहमखकर्मसांगतासिद्ध्यर्थं इदं पात्रं घृतपूरितं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे एवं तंडुलतिलशर्करापात्राणि दद्यात् ॥ न्यूनातिरिक्तदोषपरिहारार्थं नवग्रहमखकर्मसांगतासिध्यर्थं यथानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां विभज्य दातुमुत्सृजे ततो यजमानः अन्यानपि ब्राह्मणान् वित्तानुसारेण गोभूहिरण्यमन्नरत्नानां दानादिभिः पूजयेत् ॥ ततोऽभिषेकः यजमानं सपत्नीकं सपुत्रं प्रागभिमुखमासीनं आचार्यो ऋत्विजश्च रुद्रकलशात् कुशदूर्वापल्लवैश्चोदकमानीयाभिषिंचेयुः ॥ ओं आपोहिष्ठामयोभुवस्तान ऊर्ज्जे

दधातन ॥ महेरणायचक्षसे ॥ १ ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उ
शतीरिवमातरः ॥ २ ॥ तस्माअरंगमामवोयस्यक्षयायजिन्वथ॥ आपोजनयथाच
नः॥ ३ ॥ वरुणस्योत्तंभनमसि० ॥ ४ ॥ भग प्रणेतर्भगसत्यराधोभगेमांधियमुदवाद
दन्नः ॥ भगप्रणोजनयगोभिरश्वैर्भगप्रनृभिर्नृवंतःस्याम ॥ ५ ॥ इदमापःप्रवहताव
द्यंचमलंचयत् ॥ यच्चाभिदुद्रोहानृतंयच्चशेपेअभीरुणम् ॥ आपोमात्तस्मादेनसः
पवमानश्चमुंचतु ॥ ६ ॥ समुद्रायत्वाबातायस्वाहाशरीरायत्वाबातायस्वाहाअनाधृ
ष्यायत्वाबातायस्वाहाप्रतिधृष्यायत्वाबातायस्वाहा ॥ अवस्यवेत्वाबातायस्वाहासि
मिदायत्वाबातायस्वाहा ॥ ७॥ पुनंतुमादेवजनाःपुनंतुमनसाधियः॥ पुनंतुविश्वाभू
तानिजातवेदःपुनीहिमा॥ ८॥ आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यम् ॥ भवावा

जस्यसंगथे ॥९॥ शिरोमेश्रीर्यशो मुखंत्विषिःकेशाश्वश्मश्रूणि ॥ राजामेप्राणोअमृतर्ठ॰सम्राट्चक्षुर्विराट्श्रोत्रम् ॥ १० ॥ जिव्हामेभद्रंवाङ्महोमनोमन्युःस्वराड्भामःमोदाःप्रमोद ऽअंगुलीरंगानिमित्रंमेसहःबाहूमेबलमिंद्रियर्ठ॰हस्तौमेकर्मवीर्यम् आत्माक्षत्रमुरोमम ॥ ११ ॥ पृष्ठीर्म्मेराष्ट्रमुदरमर्ठ॰सौग्रीवाश्वश्रोणी ऊरूअरत्नीजानुनीविशोमेंगानिसर्वतः ॥ १२ ॥ नाभिर्मेचित्तंविज्ञानंपायुर्मेपचितिर्भसत् ॥ आनंदनंदावांडौमेभगःसौभाग्यंपसःजंघाभ्यांपद्भ्यांधर्मोस्मिविशिराजाप्रतिष्ठितः ॥ १३ ॥ पयःपृथिव्यां० ॥१४॥ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां॥सरस्वत्यैवाचोयंतुर्यंत्रियेदधामिबृहस्पतेष्ट्वासाम्राज्येनाभिषिंचाम्यसौ॥ १५॥ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ॥ सरस्वत्यैवाचोयंतुर्यंत्रे

णाग्नेःसाम्राज्येनाभिषिंचामि ॥ १६ ॥ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णो
हस्ताभ्याम् ॥ अश्विनोर्भैषज्येनतेजसेब्रह्मवर्चसायाभिषिंचामि सरस्वत्यैभैषज्येन
वीर्य्यायान्नाद्यायाभिषिंचामींद्रस्येंद्रियेणबलायश्रियैयशसेभिषिंचामि ॥ १७ ॥ पा
लाशंभवतितेनब्राह्मणोभिषिंचतिब्रह्मवैपालाशोब्रह्मणैवैनमेतदभिषिंचति ॥ १८ ॥
सर्वेषांवाएषवेदानाꣳरसोयत्सामसर्वेषामेवैनमेतद्वेदानाꣳरसेनाभिषिंचाति॥ १९ ॥
यद्देवकल्पांजुहोतिप्राणावैकल्पाअमृतमुपवैप्राणाऽअमृतेनैवैनमेतदाभिषिंचाति२०
दीर्घायुत्वायबलायवर्चसेसुप्रजास्त्वायचासाअथोजीवशरदःशतं ॥ २१ ॥ द्यौशां
तिरंतरिक्षꣳशांतिःपृथिवीशांतिरापःशांतिरोषधयःशांतिःवनस्पतयःशांतिर्विश्वेदे
वाःशांतिर्ब्रह्मशांतिः॥सर्वꣳशांतिःशांतिरेवशांतिःसामाशांतिरेधिद्विपदचतुष्पदे

भ्यः शुभशांतिर्भवतु ॥ २२ ॥ श्रीवर्चस्वमायुष्यमारोग्यमाविधात्पवमानंमहीयते ॥
धान्यंधनंपशुपुत्रलाभंशतसंवत्सरंदीर्घमायुः ॥ २३ ॥ विश्वानिदेवसवितर्दुरितानि
परासुव ॥ यद्भद्रंतन्नऽआसुव ॥ २४ ॥ शक्राद्यादेवताःसर्वेब्रह्मविष्णुमहेश्वराः ॥ सु
रास्त्वामभिषिंचंतुप्रयच्छंतुधनानिच ॥१॥ नारायणोजगन्नाथस्तथासंकर्षणोविभुः॥
प्रद्युम्नश्चानिरुद्धश्चऋद्धिंयच्छंतुतेसदा ॥ २ ॥ इंद्रोवन्हिर्यमश्चैवनैर्ऋतोवरुणस्तथा॥
वायुःकुबेरोरुद्रश्चदिक्पालाःपांतुतेसदा ॥ ३ ॥ आदित्यश्चंद्रमाभौमोबुधोजीवः
सितोर्कजः॥ ग्रहास्त्वामभिषिंचंतुराहुःकेतुस्तथैवच ॥ ४ ॥ आदित्यावसवोरुद्राविश्वे
देवामरुद्गणाः ॥ लोकपालाःप्रयच्छंतुमंगलानिप्रियंयशः ॥५॥ नारदाद्याऋषिगणाः
येचान्येचतपोधनाः ॥ भवंतुयजमानस्यआशीर्वादपरायणाः ॥ ६ ॥ गायत्रीचैवसा

वित्रीशचीलक्ष्मीसरस्वती॥ मृडानीमातरःसर्वाभवंतुवरदास्तव ॥७॥ कीर्तिर्लक्ष्मी
र्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः॥बुद्धिर्लज्जावपुःशांतिस्तुष्टिःकांतिस्त्रयोदश ॥८॥
एतास्त्वामभिषिंचंतुदेवपत्न्यःसमावृताः॥देवदानवगंधर्वायक्षराक्षसपन्नगाः ॥९॥
ऋषयोमानवागावोदेवमातरएवच॥देवपत्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः१०
अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच॥औषधानिचरत्नानिकालस्यावयवाश्चये
॥११॥सरितःसागराःशैलास्तीर्थानिजलदानदाः ॥ एतेत्वामभिषिंचंतुसर्वकार्यार्थ
सिद्धये ॥ १२ ॥ इत्यभिषेकः ॥ अभिषेकानंतरंपुण्याहवाचनंकेचित्पठंतिकेचित्तुव
रणश्राद्धानंतरमतःपूर्वंपठितंचेदत्रापिआब्रह्मन्० शतंजीव० श्रीवर्चस्वमित्याद्या
शीर्मंत्रान्पठित्वा मंत्राक्षतान् यजमानहस्तेदद्यात् दोषाभावात् यजमानोपिकृतैत

द्गृहयज्ञकर्मणोयन्न्युनमतिरिक्तं तत्सर्वंभवतांब्राह्मणानांवचनात् श्रीविष्णोर्ग्रहाणां
चप्रसादात् विधिवत्परिपूर्णमस्तु ॥ वृद्धिशतानिभवंतु इतिप्रार्थयेत् ततउत्थाय
क्षम्यतामित्युक्त्वा अग्निंग्रहांश्चप्रदक्षिणीकृत्यवेदीसमीपेगत्वा श्रीफलंनिवेद्यक्षमा
प्यनमस्कृत्यसूर्यादिन्विसर्ज्जयेत्॥ तत्रमंत्राणिओंसमुद्रंगच्छस्वाहांतरिक्षंगच्छस्वा
हादेवꣳसवितारंगच्छस्वाहामित्रावरुणौगच्छस्वाहाहोरात्रेगच्छस्वाहा छंदाꣳसि
गच्छस्वाहा द्यावापृथिवींगच्छस्वाहायज्ञंगच्छस्वाहासोमंगच्छस्वाहा दिव्यंनभो
गच्छस्वाहाग्निंवैश्वानरंगच्छस्वाहामनोमेहार्दियच्छादिवंतेधूमोगच्छतुस्वर्ज्योतिः
पृथिवींभस्मनापृणस्वाहा ॥ १ ॥ उत्तिष्ठब्रह्मणस्पतेदेवयंतस्त्वेमहे उपप्प्रयंतुमरुतः
सुदानवꣳइंद्रप्राशूर्भवासचा ॥ २ ॥ यांतुदेवगणाःसर्वेपूजामादाययाज्ञिकान्॥ इष्ट

कामसमृद्ध्यर्थं पुनरागमनायच ॥३॥ इतिपठित्वा मंत्राक्षतान्मंडलोपरिक्षिपेत् ॥ ततोब्राह्मणान्संभोज्यतदनुज्ञातः कुटुंबजनैःपरिवृतोभोजनंकुर्यात्इतिग्रहशांतिप्रयोगःसमाप्तिमगात् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

इदं पुस्तकं मुंबईयां पंडित शिवलालात्मज श्रीधरस्य ज्ञानसागर मुद्रालये मुद्रितम् शकाब्दाः १८२२ संवत् १९५७

सूचना.

हमारे ज्ञानसागर छापाखानामें अनेक तरहके वैदिक, वेदांत, पुराण, धर्मशास्त्र, कर्मकांड, व्याकरण, न्याय, छंदोपनिषद्, काव्य, अलंकार, नाटक, चंपु, कोश, वैद्यक अरु प्रकीर्णग्रंथ स्तोत्रादि, ख्याल, किस्सा, वगैरे अनेक तरहके भाषा अरु संस्कृतग्रंथ छपकर तैयारहैं. जो किसी महाशयोंको चाहिये सो दाम भेजकर मंगालेवैं. पूर्व दामोंका निश्चय करना होय तो सब पुस्तकोंका सूचीपत्र आधे आनेका टिकट भेजकर मंगालेवैं. संवत् १९५७

अजमेरमें पं॰श्रीधर शिवलालजीके ज्ञानसागर पुस्तकालय नवाबजार अजमेर.

पंडित श्रीधर शिवलालजी ज्ञानसागर छापाखाना (मुंबई)

॥ ❁ इति ग्रहशांतिः समाप्ता ❁ ॥